ORISSAN ORIENTAL TEXT SERIES (Sanskrit)—18

ŚRĪKṚṢṆALĪLĀMṚTAMAHĀKĀVYAM

Agnichit Nityananda Pandita

उटकलीय प्राच्य ग्रन्थमाला (संस्कृतम्)— १८

श्रीमदग्निर्चिन्नित्यानन्दपण्डितविरचित

श्रीकृष्णलीलामृतमहाकाव्यम्

सम्पादक :

डक्टर श्री भगवान् पण्डाशर्मा, एम्० ए०

साहित्याचार्य्यः,

ओड़िशाराज्य-पर्य्यटनक्रीड़ासंस्कृतिनिर्द्देशालयः

भुवनेश्वरम् ।

प्रकाशक :
ओड़िशाराज्य पर्यटनक्रीड़ासंस्कृतिनिर्देशालयः
भुवनेश्वरम् - ७५१०१४ ।

प्रथममुद्रणम्   १०००
१९८१

बालेश्वरस्थित निउ टाउन
मुद्रणालये मुद्रितम् ।

मूल्यम् — रु०

ORISSAN ORIENTAL TEXT SERIES (SANSKRIT)—18

ŚRĪKṚṢṆALĪLĀMṚTAMAHĀKĀVYAṂ

By

SRIMAD AGNICIT NITYANANDA PANDITA

Edited by :

Dr. Bhagaban Panda, M.A.

Sahityacharya

Editor,

Directorate of Tourism, Sports & Culture,

Orissa, Bhubaneswar.

Published by :
DIRECTORATE OF TOURISM, SPORTS & CULTURE,
Orissa, Bhubaneswar - 751014.

FIRST EDITION—1000
1981

Printed at :
NEW TOWN·PRESS
Balasore - 756003.

PRICE : Rs.

INTRODUCTION

The present edition of Srī Kṛṣṇalīlāmṛtâ mahākāvyam by Agnichit (Chayani) Pandita Nityananda is one of the famous imitations of Gītagovinda by Kavirāja Jayadeva (12th. Century) who flourished during the Ganga rule in Orissa. The editing of this work is based on the following manuscripts preserved in the manuscript library of the Orissa State Museum and in the Utkal University library, Bhubaneswar.

DESCRIPTION OF MANUSCRIPTS—

(i) Ka - No. L. 254.

This palmleaf manuscript is preserved in the Orissa State Museum, Bhubaneswar. It contains 25 folios each measuring 20·9×4·1 C. M. and is fairly preserved. There are two to six lines of writing in Oriya characters on each side of the each folio. The text is complete. The date of copy of the manuscript is the C. 18th. Century. There is no colophon or name of the scribe at the end. This was collected from Pandita P. N. Mishra, lecturer, Sadasiva Sanskrit College, Puri on the 4rth. March, 1961.

(ii) Kha - No. 56.

This is a paper manuscript of the Orissa State Museum, Bhubaneswar. It contains 17 pages. Each page measures 3·03 × 20·2 C, M. There are twenty one to twenty five lines of writing in Oriya characters on one side of each page. The text is complete. It has also no colophon at

the end. This has been acquired from Damodar Dash of Bhubaneswar, Puri on the 5th. December, 1968.

(*iii*) *Ga — No. L. 215*

This is a palmleaf manuscript preserved in the manuscript section of the Utkal University library, Bhubaneswar. This contains 62 folios each measuring 29. 8 × 3. 3 C. M. There are four lines of writing in Oriya characters on each side of the each folio. The text is complete. It contains Nīlādrinātha Śatakam by the same author from folio 44 to 62 of the said manuscript. There is no colophon or name of the scribe at the end. The date of copy is C. 18th. Century.

(*iv*) *Gha —*

Apart from the above manuscripts the help of 'Manoramā' a Sanskrit Journal (now defunct) has been utilised at the time of editing. Pandit A. T. Sharma, the learned editor of the above Journal has published this Srī Kṛṣṇalīlāmṛta canto I - VI and VII - VIII in the 6th year issue of 'Manoramā', 1966 - 67 from page 117 - 148 and 237 - 249 respectively. All the above mentioned scripts have been footnoted as क, ख, ग and घ in the text.

POET NITYANANDA—

The poet, Pandita Nityananda has composed the Srī Kṛṣṇalīlāmṛta, the work under discussion and attributed authorship of its songs to his patron Vanamālī Jagaddeva (1723 - 1734 AD) the Chief of the Khandapada State, situated in the district of Puri. The dramatist Anādi

Miśra who adorned the royal court of Khandapada has also mentioned the name of Vanamali Jagaddeva in his Rāsagoṣthirūpakam. [1]

Pandita Nityananda was also credited with two other works namely 'Sivalīlāmṛtamahākāvyam' and 'Nilādrināthaśatakam'. But the authorship of the first work is attributed to his patron Gadādhara Māndhātā (1657-1689 AD), the Rājā of Navadurga or the Ex-State of Nayagarh in the district of Puri. [2] The poet was born in a Brāhmaṇa family having Kaundinya gotra of Agnichit or Agnihotri section for which his title may be taken as Chayani as mentioned in his Śataka stated above. [3] No other information about the family, genealogy and the native place of the author is available from his works discovered so far. The dramatist, poet Anādi Miśra was a contemporary of Nityananda. Besides the 'Rasagosthirupaka' poet Anadi was the author of 'Maṇimālānātika' and 'Kelikallolinī', a kāvya[4] and adorned the court of Vanamālī Jagaddeva. But he has not made any reference to his other contemporary poet in his above works.

---

1. a) Śrikṛṣnalīlāmṛta — Canto - I. Verse—12 - 13.
   b) Rāsagosthirūpaka — OSM—Mss. No. L. 319 - B.
   c) Khurudha Itihasa (Oriya) K. N. Mahapatra, Bhubaneswar, 1971, Page - 109.
2. a) Śivalilamṛta - Ed. B. Panda, Directorate of culture, Bhubaneswar, 1978, Canto - I. Verse - 15 - 16,
   b) A Descriptive Cat. of Sanskrit Mss. Vol. II - K. N. Mahapatra, Bhubaneswar, 1960. P - CLI.
3. a) Śivalilamṛta — Canto - I. Verse - 37.
   b) Nilādrināthа Śataka — Verse - 101.
4. Kelikallolinī — Ed. Smt. P. Mishra, Directorate of culture, Bhubaneswar, 1980

The poet Nityānanda has praised the Lord Laddukeśa,[5] the deity installed in the village of Saranakula near Nayāgarh and most probably adorned the courts of the chiefs of Nayāgarh and Khandapadā which are adjoining regions. Brahmanas of Kaundinya gotra are still seen in those areas. Hence the author must have been born some where in this part of the Puri district. According to late K. N Mahapatra it can be concluded that the poet Nityananda Chayani patronised by Gadādhara Simha Māndhātā flourished in the second half of seventeenth century.[6] From the fact discussed above the time of the poet Pandita Nityananda Chayani may tentatively be fixed between 1680 - 1724 A.D. till more convincing historical evidences are available.

WORKS OF NITYANANDA —

By the time of Pandita Nityananda three other lyrical Kāvyas namely 'Abhinava Gītagovindamahākāvyam' written by Kavichandra Rāy Divākara Misra (1450-1515-A.D.) and attributed to Gajapati Purusottama Deva (1466-1497 - A.D.), 'Rukminīparinayamahākāvyam' by Narayana Bhanja Deva (1473-1534 - A.D) and 'Mukundavilāsamahākāvyam' by Jateendra Raghūttama Tīrtha (1620-1680 - A.D.) besides the famous 'Gītagovindamahākāvyam' of Kavirāja Jayadeva were in circulation among the scholars of Orissa.[7] As such a very good background for writing Sanskrit lyrical kāvya on the love episode of Rādhakṛṣṇa had been created in the then Orissa.

5. Śivalilāmṛta — Canto - I. Verse - 14

6. A descriptive Cat. of Sanskrit Mss. Vol. II - P - CLI.

7. a) Abhinavagitagovinda Ed. Dr. B. Panda, Directorate of Culture, BBSR, 1977, Canto - I, Verse - 5

b) Rukmini parinaya — Ed. Dr. B. Panda, Directorate of Culture, BBSR, 1974, Canto - I, Verse - 3.

c) Mukundavilāsa Ed. Dr. B. Panda, Directorate of Culture, BBSR, 1986, Canto - I, - Verse—6, 13

Being influenced by the traditional Kṛṣṇa theme Pandita Nityānanda wrote two lyrical works viz 'Śvalīlāmṛta mahākāvyam' and Sri Kṛṣṇalīlāmṛtamahākāvyam' in imitation of Gītagovinda along with one Śataka called 'Nīlādrinātha Satakam'. The contents of these works are briefly discussed here as follows.

SIVALILAMRTA MAHAKAVYAM—

The author has collected different episodes from various purānas and presented them in this 'Mahākāvya' with deep devotion and exultant emotion to sing the glory of Bhubaneśvara of Ekāmrakṣetra. A close study of this work gives the impression that the poet drew the materials for composing this work from the 'Sāralā Mahābhārata'[8] written in Oriya by Śūdramuni Mahākavi Sāralā Dasa (1435 - 1466 A.D.), 'Kumārasambhavam'[9] of the great Kalidasa, 'Śivapurāṇa'[10], 'Ekāmrapurāna'[11], 'Kapila-samhitā'[12] and 'Svarṇādrimahodaya'[13] out of which last three puranic works were compiled by the Oriya scholars prior to the seventeenth century A.D. They all describe elaborately the sanctity and greatness of the place, the temples and the tanks of Bhubaneswar, known as the temple city of India. The story is summed up below—

---

8. Sarala Mahabharata - Ed. Dr. A. B. Mohanty, Directorate of Culture, BBSR, Vanaparva - P - - 80-89

9. Kumarasambhavam—Canto-I-3 and 5-8.

10. Śivapurāna—Uttarakhanda—OSM - Mss. No. P - 45, Ch. XIII—XXVIII.

11. Ekāmrapurāna—Ed. L. Garavadu—Ch. XI- XXVI.

12. Kapilasamhita—Ch.-X—XVIII.

13. Svarnādrimahodaya—Ed. R. Garavadu, 1912, Ch. II—XII.

After the wedding of Śiva and Pārvatī was over Pārvatī declined to stay longer in the abode of her father Himālaya. Śiva in conformity with the wishes of his beloved selected Vārāṇasī as the abode. Vārānasī grew in fame and gradually became crowded with innumerable devotees. Pārvatī wished to have a secluded place and they setout on the bull Nandi in search of a suitable place. Incidentally they came across a beautiful place named 'Ekāmra Kānana'. This place was upto their choice. As Śiva, the Lord of the Universe was otherwise busy, he wanted Pārvatī to survey the suitability of the place for the abode. Pārvatī in the guise of a milk-maid (Gopālinī) continued to stay at Ekāmra and wander about the place to know more details.

This place was being ruled by two demon Asura Kings Kīrti and Vāsa. They had their place on the top of Svarṇādri hills. Once when Pārvatī in the garb of a milk-maid was out on her daily round of survey, she came into the view of these two demon brothers who demanded curd of her and thereafter they took curd from her daily. Subsequently their demand for curd changed into the demand for hand of Pārvatī for marriage. Pārvatī, the mother of the universe, in reply proposed that he, who could carry her on his shoulders, would be her husband. There upon a duel started among the brothers, each wanting to carry Pārvatī on his shoulders and thereby win her. Pārvatī intervened and told that both of them, if they so desired, could carry her.

The two demons carried Pārvatī in the garb of a milk-maid on their shoulders, but as the time passed by, their burden increased in weight. They became extremely tired and soon were unable to carry her. It was late

when they could realise the truth and repented for their folly. When their end drew near, they prayed to the Divine Mother that at least their names should be immortalised after their death. Devī trampled upon them and the pressure was so great that the earth could not bear it and there appeared a pit of considerable depth which is now known as 'Devīpādaharā' tank.

After this physical exertion Devī Pārvatī felt thirsty and prayed to Lord to come to her aid. Śiva appeared on the scene and heard the entire account. He pierced his trident into the earth and the Gangā sprang out drop by drop which ultimately formed the tank now known as Vindusarovara.[14] This puranic story is corroborated by their historical, epigraphical and iconographical evidences and the place is known after their (Kīrti and Vāsa) name as Kṛttivāsa Kṣetra.[15]

Another legend states that Vindusarovara was dug at the time of the inaugural function of the great Lingaraja (Kṛttivāsa) temple and Śiva sent his bull Nandi to invite all the sacred river deities of India to His holy shrine. All accepted the invitation but Godāvari declined to come with the plea that as she was not pure being then in her menses it was not proper for her to go on the back of Nandi with other invitees. When Śiva learnt about Godāvarī's refusal he cursed Godāvarī to remain unholy for all times. Godāvarī felt depressed and sought the advice of Bṛhaspati who directed her to urge upon Pārvatī

---

14 Śivapurāṇa Uttarakhanda—(OSM - MSS) Ch XXVII.

15. Archaeological Remains at Bhubaneswar—Dr. K. C. Panigrahi, Calcutta, 1961, P.223.

through her Vāhana or the lion to persuade Śiva to modify his course. Pārvatī accordingly intervened on behalf of Godāvari and Śiva granted Godāvarī queried boon that she could be holy only during 'Simha-Vṛhaspati-Yoga' which falls once in every twelve years. This was the source of the story which tempted the poet Nityānanda to compose his Śivalīlamṛtamahākāvya.[16]

In form and style it is a lyrical kavya based on the episode of Śiva and Pārvatī as narrated in the Puranic works of Orissa mentioned above. The work contains 42 songs and 293 verses composed in different rāgas and metres respectively. The subject matter of the work is summed up cantowise as follows. (i) Pārvatī Sambhava (ii) Gaurī-tapa–paripāka (iii) Śiva Vivāha (iv) Sampanna Nandanānandana (v) Kaśipraveśa (vi) Satyavatyanugraha (vii) Ekāmrakānana Varnana (viii) Ekmâra-vana Vihāra (ix) Rambhoru Vipralambha and (x) Rāsa-līla Varnana.[17]

The songs are composed in the following 20 rāgas which are alphabetically arranged :—

Aśavarī, Kalyāna-āharī, Kamodi, Kedāra, Gurjjarī, Gundakirī, Gaurī, Todī, Deśākhya, Nāta or Nātaka, Bhairava, Mangala gujjarl, Mallāra, Māru, Malavaśrī, Mukhāvarī, Vangalasrī, Varādī, Vasanta and Sāranga. The author has also used 11. tālas for different songs namely Adda, Adi, Eka, Kuduka, Jhampaka, Triputa, Dedhi, Nisari, Padi, Mantha and Yati.

---

16. Śivalilamṛta—Ed. B. Panda, BBSR, P. 6-8.

17. Ibid. P. 8-11.

NILADRINATHA SATAKAM—

The work containing 101 verses composed in Sragdharā metre, is known so far as the third work of Pandita Nityānanda. It is composed in praise of Lord Jagannātha at Nilāchala or Puruṣottama Puri and as such it may come under the category of devotional lyric poetry. The depiction of thoughts relating to God in ornamental language is marked in each verse of this Śatakakāvya which touches the hearts of devotees and proves the erudition of the poet. This Śataka has been appended with this volume for reference of the scholars.

SRIKRSNALILAMRTA MAHAKAVYAM—

The poet Nityānanda has composed this Śrikṛṣṇalīlāmṛta in imitation of Gītagovinda by Jayadeva and Abhinavagītagovinda by Gajapati Puruṣottama Deva composed earlier on the theme of Radhākṛṣṇalīlā, the most popular subject of art and literature of the 17th. century India.

Summary of the work :

Canto—I

GOPIPURVANURAGA

The work begins, with the benedictory verses to Lord Kṛṣṇa who goes by the synonyms of Mukunda, Aja, Rādhādhava, the embodiment of Brahma. He is the beloved son of Nanda. He bears different incarnations for the wellbeing of his devotees (Verse—1-7). The poet

then goes to narrate the name, the merit, and the purpose of the composition of his work Śrikṛṣṇalīlāmṛta and eulogises the patron, Vanamāli, the king of Garga dynasty (V. 8-14). Pandita Nityānanda prays the Lord Kṛṣṇa expressed in the names of Gopāla, Mādhava,, Jagadīśa. He adorns the Nīlāchala of Puri in his fourfold forms combining in himself the symbol of all the sectorian religious faiths (V. 15-16, Prabandha – 1-3).

The topic begins with the depiction of Vṛndāvana. Once Rādhā with her lady companion went to the bank of Yamunā to pass her time, amidst the natural beauty. She saw Kiśora Kṛṣṇa in a Vilāsamandira (pleasure house) under the trees and told her friend to see the activities of the son of Nanda who was playing on the flute among the cow-herd boys. The companion watches over the scene and marked passionate expression in Rādhā and consoled her. All, afterwards returned back to their homes in the evening (V. 17-28, P. 4-6)

Canto—II

PRACHURAKAISORALILA

The second canto begins with the description of the morning scene. The daily life of the ladies at Brajapurī is revealed in the busy churning of the curd. Their necklaces and ear ornaments were dancing with the active and beautiful body in course of churning the curd. While doing so the fragrantic jasmine flowers rolling down their curley black hairs. With the intention of awaiting Kṛṣṇa, Yośoda began murmuring a song which kept Kṛṣṇa sprang up from his bed. Then he played with Yośoda along with Gopīs were lured to watch the beauty

of Kṛṣṇa during playing his playful activities (V. 1-5, P. 7-8). Kṛṣṇa and Balarāma started for Vṛndāvana with their herd of cattle after the daily preliminaries of bath, food and milching.

They played in Vṛndāvana as their wish warrant for a long period. One of his friend told Kṛṣṇa to look at the river Yamunā which appeared to be following him like an enchanted young damsel. Śrīkṛṣṇa was delighed and he played on his sweet flute. They returned home at the close of the day (V. 6-2 P. 9-11).

Canto—III

RADHAVIRAHAVADHAVATARA

In narrating the beauties of nature the companion of Rādhā awakened the pathetic mood in her. She longs for Kṛṣṇa who has deserted her in the most beautiful and enchanting surrounding of the autumnal environs (V 1-5, P. 12-13). Then they both went to Vṛndavana where the friend of Rādhā met Kṛṣṇa and narrated the painful condition of her companion (V 6-11, P-14). Kṛṣṇa expressed before her his heartful love for Rādhā and assured her in every manner to meet her in no time. With the message of Kṛṣṇa Dūtī returned back and narrated before Rādhā for all that she had done (V. 12-14, P-15).

Canto—IV

KAMITA RADHAMADHAVA

The canto begins with the description of the approaching moonlit night. Kṛṣṇa plays on his flute joyfully.

On hearing the enchanting tuning of the flute all the Gopīs ran to the bank of Yamunā unmindful of their dresses, ornaments and the near and dear ones (V. 1-8, P. 16). On their arrival Madhava asks them smilingly how they could come to this dense forest which is full of dreadful animals. It is not good to disregard the laws and customs of the society in which they live. So they were asked to go back to their respective homes. Being disappointed by Kṛṣṇa the Gopīs prayed him and begged his mercy. Kṛṣṇa became sympathetic and joined them in Rāsanṛtya. After some time he vanished from among the Gopīs without any knowledge of anybody (V. 9-19, P, 17-20).

Canto—V

VIRAHIVARAVARNANIKA

In this canto it is depicted that after the disappearance of Kṛṣṇa, the Gopīs realised the absence of their beloved and repented for their own mistake. They went on searching for Kṛṣṇa in the woods and creepers and begged the trees and creepers to let them know the whereabouts of Kṛṣṇa (V. 1-11, P. 21-23). In the mean time they started anacting the activities of Kṛṣṇa and forget the absence of the Lord. Being frustrated afterwards they went on searching him following the foot prints of Kṛṣṇa but all attempts proved to be fruitless. At last all the Gopīs assembled on the bank of the river Yamunā and prayed Lord Kṛṣṇa. This made Kṛṣṇa satisfied (V. 12-20, P. 24).

Canto—VI

DUHSADHARADHA

This canto starts with the description of the love play between Rādhā and Kṛṣṇa. Both slipped out unnoticed from the Rāsanṛtya. During the love play Kṛṣṇa addressed Rādhā as Kalāvatī. Rādhā became angry with Kṛṣṇa mistaking address as the name of a Gopī. Kṛṣṇa tried to appease her but failed and went away to another kunja (V. 1-14, P. 25-26). Rādhā repented for her deeds. Kṛṣṇa again looked to the beauty of Rādhā and thinking it impossible to console her, he remembered Vṛnda, the best of the friends of Radha to pacify Rādhā's anger (V. 15-20, P. 27-28).

Canto—VII

PRAMUDITAMADHAVA

In this canto it is told that when Kṛṣṇa vanished with Rādhā from the Rāsamandala at Vṛndavana, all the Gopīs headed by Vṛnda went on searching after them in the forest. Vṛnda felt very sorry when she saw Rādhā laying alone in a grove. She told her sad plight to Rādhā and consoling her went on searching after Kṛṣṇa (V. 1-9, P. 29-30). Vṛnda after meeting Kṛṣṇa returned and persued Rādhā to meet Kṛṣṇa who was waiting in earnest eager for her. Rādhā went to the kunja where she met Kṛṣṇa. Rādhā and Kṛṣṇa played love to their satisfaction after which Rādhā requested Kṛṣṇa to decorate her properly. After this they went to take part in the Rāsanṛtya (V. 10-22, P. 31-33).

Canto—VIII

SANANDAMUKUNDA

This canto describes that the Gopīs who were waiting eagerly for Kṛṣṇa with great anxiety received him heartily and started delightfully their dance encircling him and it was witnessed by the divine souls in the sky (V. 1-9, P. 34-35). Kṛṣṇa made himself equivalent in number to that of the Gopis and played with each one of them. The Gopīs each being satisfied high praised Kṛṣṇa. They all went to Yamunā with Kṛṣṇa for their amorous game in the water which ended at the approach of the dawn. The Gopīs dressed and decorated properly went back to their houses (V. 10-29, P. 36-38). In the concluding verse the poet described the nature of the work and expects for its hearty appreciation by the devotees of Rādhāmādhava and the admirers of the Bhāgavata (V. 30-33).

Critical Appreciation :

ARRANGEMENT—

This Śrīkṛṣṇalīlāmṛtamahākāvyam, a lyrical work, has been composed in the form and style of Gītagovinda, a noted novel creation in the history of Sanskrit literature. It is divided into 8 rāgas (cantos), 38 Gītas (Prabandha songs) and 181 verses composed in 29 different Rāgas and 25 metres respectively. The songs of the work has also been divided further into two to eight stanzas which can be called dvipadī, chatuṣpadī, ṣatpadī and aṣtapadī songs as prevalent in medieval Oriya literature.

Pandita Nityānanda Chayani being a devoted musician and poet of eminence was influenced by the Vaiṣṇava faith and movement of Orissa and followed foot prints of Kavirāja Jayadeva, a native poet of his own district (Puri at present) who is well known to all the Sanskrit scholars of the world.

The poet Nityānanda was an ardent devotee of Lord Jagannātha who according to the poet is in one from the embodiment of the five principal deities viz., Ganeśa, Bhaskara, Viṣṇu, Śiva and Durgā and Rādhā-kṛṣṇa, Harihara and others. The poet has also got the inspiration from the Vaiṣṇava faith and movement preached through the Oriya literature of Pañchasakhā or five-intimates of Orissa. The author being Vaiṣṇava musician has composed his first work named 'Śivalīlāmṛta' at the behaste of the patron Gadadhara Mandhata, a devotee of Laddukeśa enshrined at Sarankuḷ village in the district of Puri. The present work under discussion in his second piece of work based on the Rādhākṛṣṇa Rāsalīlā.

RAGAS—

The following twenty nine rāgas have been used for different songs and they are arranged here alphabetically indicating the number of the canto and the Prabandha in the bracket (as C. P.) against each—

Āśāvarī (C. 1-3, P-4, 5, 13), Ābāri (C-5, P-22), Karṇāta (C-4, P-19), Kalyāṇa (C-1, P-3), Kalāṇa-ābāri (C-1, P-1), Kāmodī (C-7, 8, P-30, 35), Kedāra (C-3, P-15), Gaurī (C-2, P-11), Chintākedāra (C-5, P-23), Dakṣhiṇa Kāmodi (C-6, 8, P - 26-36), Deśākhya (C-2,

P-9), Dhanāsi (C-1, P-2), Nāta (C-8, P-37), Nādarāmakerī (C-6, P-28), Bhairava (C-4, P-16, 18), Bhairavī (C-7, P-33), Mañgalagujjarī (C-2, P-8), Mallāra (C-6, P-27), Māru (C-3, 4, P-14, 17), Mālava (C-8, P-34), Mukhāvarī (C-1, 3, 7, P-6, 12, 32), Lalita (C-6, P-25), Vañgālaśri (C-5, P-24), Varādī (C 8, P-38) Vasanta (C-4, P-20), Vibhāsa (C-2, P-7), Śankarābharaṇa (C-2, 7, P-10, 31), Sāranga (C-7, P-29) and Saurāṣtragujjarī (C-5, P-21).

METRES—

The following twentyfive metres have been used in this work for 181 verses and they are arranged alphabatically indicating the number of the canto and the number of the verse in the bracket (as C. V.) as follows—

Anuṣtup (C-I. V-22, 26, C-II. V-17, 19, 21, C-III. V-4, C-IV. V-1, 6, 15, 17, C-V. V-16, C-VI. V-7, 13, 19, C-VII, V-4 and C-VIII. V-3, 13, 30), Āryā (I-1, 11, 12, 14, IV-10, V-3, 12, 17, 20, VI-8, 9, 14, 16, 17, VII-3, 9-11, 21 and VIII-26, 29, 32), Upendravajrā (V-10, 11), Upajāti (I-10, 13, II-12, IV-11, VII-1 and VIII-24) Drutavilambita (II-3, 4, VI-5, VII-7, 8, 18 and VIII-23), Puṣpitagrā (II-4, 16, VI-5), Pṛthvī (II-20, 23, III-16, 17, 27, V-8, and VI-6), Pramitākṣarā (VII-13), Praharṣiṇī (VI-20), Vasantatilaka (V-I, VIII-5, 10, 22), Viyoginī (II-2, 5, 8-10, III-1, 13), Vidyunmālā (V-4, VII-14, 17, VIII-17), Vamśastha (II-11, V-5, 13, 14, VI-2, VIII-18), Vamśasthavila (II-11 VI-2, 12 and VIII-18), Mandākrāntā (III-3, 12, IV-5, VI-4 and VIII-1), Manjubhāṣiṇi (VI-15, VII-6, and VIII-9, 14, 14, 16), Mattamayuri (V-2), Malinī (I-25, II-6, 13, 18, 22, 24, 25, III-2, 5, 14, IV-8, 14, V-18, 19, VI-12, VII-7 and VIII-8 20), Mṛgendrasukha (II-3),

Rathoddhata (I-17-20; 24, II-14; 15; III-6-9, IV-4; V-9; VII-16 and VIII-4, 11), Ruchirā (I-21, 28), Śārdula-vikridita (I-2, 3, 5, 8, 9, 15, 16, II-1, III-10, IV-7; 12, 13, 16, 18, 19, V-6, 16, VI-10, 11, 18: VIII-6, 33), Śikhariṇi (I-9, III-11 and VII-19), Sragdharā (I-4, 6, 7, 23, 27, VIII-2, 13, 15, 28), Samādhi (VI-2) and Hariṇi (VII-14, 19 and VIII-27-30).

POETIC BEAUTY—

The poet has tried his best to use smooth and palatable words to maintain the rythm of all the times of the work in imitation of Gītagovinda. He advocates in favour the beauty of his work and speaks that the people good or bad, will get pleasure out of his work.[18] Since it narrates the līlā of Achyuta. The work is praiseworthy because it makes all happy as certain chemicals convert iron into gold.[19] The author further speaks that the work containing lucid, beautiful and meaningful words, like a beautiful dancing girl will please all who have the taste for Rasa in mind—

खचितसुवर्णाभरणा रुचिरपदालंकृतिध्वनिस्फुरणा ।
रसिकमनो मदयन्ती कविता वाराङ्गनेव नृत्यन्ती ॥[20]

Following the ideals of the previous authors, the poet Nityananda pays homage to Lord Jagannātha and declares that the lord of Nīlāchala is one in all. He is no other than Mādhava or Rādhādhava who bears the fourfold form.[21]

---

18. Śrikṛṣṇalilāmṛta — Canto - I. Verse —9.
19. Ibid - V—10.
20. Śrikṛṣṇalilāmṛta — Canto - I. Verse - 11.
21. Ibid - Verse—16.

The night of the autumn season becomes flooded with moon beams. Śrīkṛṣṇa plays his flute. The Gopīs being bewildered with the hearing of the sweet melodies from his flute rushed to the forest. The poet draws a real picture of the Gopīs who without caring their dress and ornaments ran to meet their beloved Kṛṣṇa at the forest garden—

करधृतविगलितकुन्तलहारा । त्रुटितघनस्तनतटमणिहारा ॥
एकनयनकृतकज्जलसङ्गा । गोपयुवतिरतिभावतरङ्गा ॥
एकचरणधृतयावकरागा । समुदिततदितरविषयाविरागा ॥
चिरमनवस्थितपरिहृतदोहा । मृदुमुरलीरवसमुचितमोहा ॥
सामिरचितकुचमृगमदपत्रा । अतुलचलत्कृतितरलितनेत्रा ॥
प्रतिपदविगलदलङ्कृतिसारा । मदनमदाहितविविधविकारा ॥[22]

The word 'Kalāvatī' used by the poet Kavirāja Jayadeva[23] finds mention in most of the lyrical kavyas composed in imitation of Gītagovinda in Orissa. The Oriya poets have also followed the tradition in their imaginary kāvyas since 16th. century A.D. Rādhā the heroine becomes angry with Kṛṣṇa thinking Kalavati as another lady love of Kṛṣṇa, the hero. By this, the author takes time and scope to appease her. This is a peculiar aspect of Sanskrit and Oriya lyrical works traditionalised in Orissa following the foot prints of Jayadeva, the author of the immortal work Gītagovinda and the most popular

---

22. Śrīkṛṣṇalīlāmṛta—Prabandha-16.

23. Gītagovinda—X–7.

poet of Orissa. The poet Nityananda also says—

कलावति कलावति प्रियतमे मनो जन्मनो
भृशं प्रणयिनीं दृशं मयि निधेहि राधे विधौ ॥
विधौ तदनुमोदिनि प्रकृतितोऽधुना नोचितं
हितं प्रतिसमीहितं किमपि वक्तुमस्मादृशैः ॥[24]

As Kṛṣṇa placates to diffuse the anger of Rādhā in the Gītagovinda so also the present author makes similar approaches in this work. Likewise the songs No. 21 and and 24 of Gītagovinda can be compared with the songs No. 31 and 33 of Śrīkṛṣṇalīlāmṛta. The poet Nityananda concludes his work saying –

राधामाधवकेलिकौतुकपरं यद्यन्तरं निर्भरं
चेतश्चेत्कवितासुधाजलनिधावाप्लावमाशंसति ।
श्रीमद्भगवतामृताम्बुधिसमुद्भूतं तदानन्दनं
नित्यानन्दकवेरवेहि भणितं श्रीकृष्णलीलामृतम् ॥[25]

as Jayadeva has spoken 'यद्गान्धर्वकलासु·· ··· श्रीगीतगोविन्दत:' in the Gītagovinda.[26]

---

24. Śrīkṛṣṇalīlāmṛta—IV – 6.
25. Śrīkṛṣṇalīlāmṛta—VIII - 33.
26. Gītagovinda XII—

EDITORIAL

The lyrical Kāvya Śivalīlāmṛta by Nityananda was published in 1978 and his similar work Śrīkṛṣṇalilāmrta is now being published after remaining pending for a pretty long time in the press. The third work Nīlādrinathaśataka of the above author discovered so far, has been appended with this edition to avoid further delay in printing. Inspite of our best attempts printing errors could not be avoided. The learned scholars will bear with the difficulties while they go through the work.

I am thankful to Pandita Nilamani Mishra, Curator of manuscripts and Rabinarayan Das, Curator, Orissa State Museum, Srimati Pramila Mishra, Editor of Directorate Culture Orissa BBSR, Sri Suresh Chandra Jena and Sakuntala Panda, Asst. Editors for their advice and timely assistance for comparing the scripts and preparing the press copy of the work.

I hope this work, as an imitation of Gītagovinda and the fifth in the series of Orissa will no doubt attract the attention of scholars and aid some more things to the Vaiṣṇava literature of India.

Nīlāchala Purṇimā
The 2nd July, 1985.

Bhagaban Panda
Editor

॥ विषयसूची ॥

सर्गः	विषयः	पत्रम्
प्रथमः	गोपिकापूर्वानुरागः	१
द्वितीयः	प्रचुरकैशोरलीलः	११
तृतीयः	राधाविरहवाधावतारः	१८
चतुर्थः	कामितराधामाधवः	२३
पञ्चमः	विरहिवरवर्णनिकः	३०
षष्ठः	दुःसाधराधः	३७
सप्तमः	प्रमुदितमाधवः	४४
अष्टमः	सानन्दमुकुन्दः	५१

श्रीकृष्णलीलामृतमहाकाव्यम्

प्रथमः सर्गः

श्रीकृष्णाय नमः

स्मरत मुकुन्दममायं स्मरतनुं[1] लावण्यसारसमुदायम्[2] ।
विधुनुतहासविलासं विधुनुतसंसारसंकटायासम् ॥ १ ॥

येनाजेन जगच्चतुर्विधमिदं वीजेन जंजन्यते
जातं जीवति येन च प्रविलये भस्माति[3] यत्राखिलम् ।
नित्यं वेदशिरो[4] गिरोदितघनानन्दः स नन्दात्मजो
रङ्गे मे हृदयस्फुटत्सरसिजोत्सङ्गे नरीनृत्यताम् ॥ २ ॥

केचिच्छङ्करकिङ्कराः कतिचन श्रीशार्चने तत्पराः
केचिद्भूमिधराधिराजतनयापादाम्बुजालम्बनाः ।
हेरम्बं कतिचिद्भजन्ति नितरामादित्यमेके नरा
एवं भिन्नधिया यजन्ति बहुधा राधाधवं साधवः ॥ ३ ॥

आसीदग्रे य एकः प्रकृतिरथ पुमानित्यभूच्च द्विधा य-
स्त्रेधा ब्रह्मा गिरीशो हरिरिति बहुधा दृश्यविश्वप्रभेदात्[5] ।
तं वृन्दारण्यपुण्यप्रथनपरवेशं गोपवेशं सुरेशं
नित्यं प्रत्यङ्गमालिङ्गितललिततनुं राधयाराधयामः ॥ ४ ॥

---

1. क. स्मरतनु ।
2. ख. समुदयम ।
3. क. सक्षमात्तस्माति ।
4. क. वेदगिरो ।
5. क. प्रेभेदात् ।

॥ २ ॥

नेदं नेदमिति श्रुतिः प्रतिपदं ब्रूते यदर्थात्पदं
तद्भिन्नप्रतिषेधतोऽवधितया सिद्धं जगत्कारणम् ।
तन्नन्दव्रजसुन्दरीजनघनप्रेमास्पदं भूषय-
न्नन्दालिन्दमहो महो विजयते गोपालबालश्रिया ॥ ५ ॥

यस्मिन्नध्यक्तमेतद्विलसति निखिलं सत्यवत्सत्यसत्यं
यच्चैतन्यांशलेशाज्जड़मजड़तयाभाति[1] देहेन्द्रियादिः ।
सत्ये यस्मिन्नुदीते स्वयमकृततया लीयते च प्रपञ्च-
स्तद्ब्रह्माद्वैतमाद्यं व्रजभुवि मनुते नन्दनं नन्दपत्नी ॥ ६ ॥

दर्पोत्सेकादनन्तां दलयति बलवन्मन्दराजन्यचक्रे
यश्चक्रे शक्रसूनुप्रणिहितनिलयाद्[2]भूमिभारावतारम् ।
वारं वारं वृणीते स्वजनहितकृते यश्च नानावतारं
कारं कारं तदीयं गुणगणगुणनं नेतुमिच्छामजन्मा ॥ ७ ॥

सारासार विवेक सेकसलिलैर्नीता विवृद्धिं परा-
माश्रित्याच्युतकल्पपादपवरं वाग्वल्लरीयं मम ।
आक्रम्य क्रमशो दिशो दशयशोवृन्दानि नन्दात्मज-
स्यातेने कुसुमानि यानि नितरामुत्तंसितानि श्रुतेः ॥ ८ ॥

---

1. ख. लेशाद्गलितमदतयोद्भाति ।
2. क. कलयात् ।

॥ ३ ॥

अनादृत्यं सत्यं यदि भवतु मे काव्यमसतां
सतामेतन्नित्यं श्रवणगतमत्यन्तसुखदम् ।
मृषा दोषारोपं परकृतिषु जानन्ति न परं
गुणाय[1] श्लाघन्ते प्रकृति[2]गुणगृह्या हि कृतिनः ॥ ९ ॥

काव्ये[3] मम स्यादिह यद्यवद्यं किञ्चित्तदप्यच्युत[4]भावहृद्यम् ।
अयोऽपि किं सिद्धरसप्रसङ्गान्न चारुचामीकरतामुपैति ॥ १० ॥

खचितसुवर्णाभरणा रुचिरपदालंकृति[5]ध्वनिस्फुरणा ।
रसिकमनो मदयन्ती कविता वाराङ्गनेव नृत्यन्ती ॥ ११ ॥

गर्ग[6]न्वयोदन्वदुदितशीतधामाभिरामाकृतिरुग्रधामा[7] ।
श्रीमान्य आसीद्वनमालिनामा[8] नृपोऽर्थकामाधिकदानशौण्डः ॥ १२ ॥

तदीयनामाङ्कितगीतबन्धं कर्त्तुं प्रवर्त्ते रुचिरं प्रबन्धम् ।
श्रीकृष्णपादाम्बुजभृङ्गगेय[9] श्रीकृष्णलीलामृतनामधेयम् ॥ १३ ॥

गायं गायं हरेर्नाम पायं पायं च तद्यशः ।
ध्यायं ध्यायमिदं रूपं सन्तोऽसन्तोषमुज्झत[10] ॥ १४ ॥

---

1. क. गृणाय ।
2. क. प्रकृति ।
3. ख. काव्यं ।
4. क. तदप्युच्युत ।
5. ख. पादालंकृति ।
6. ख. गङ्गा ।
7. क. कृतिभृग्रधामा ।
8. ख. नाम्ना ।
9. ख. तोयं ।
10. क. मुह्यत ।

प्रथमः प्रबन्धः

कल्याणाहारी रागेण गीयते

मनसिजसुन्दर गोपपुरन्दर कुन्दरदन घन[1]रुचिररुचे ।
पदनतशङ्कर वृजिनभयङ्कर किंकरजनहित[2]जनितरुचे ॥
जय जय माधव जय नृहरे । पतितं मामव भवकुहरे ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

त्रिभुवनरक्षण परमविचक्षण लक्षणविर[3]हितमनुजगते ।
परिहृतदूषण विबुधविभूषण भूषणतनुकृतगुणवितते ॥ २ ॥

निखिलगुहाशय निर्मलिताशय नाशय भयकृदहं मम ते ।
सुरकुलनायक शुभफलदायक कायकलितनिजरक्तरते ॥ ३ ॥

गुणमणिसागर गोकुलनागर रागरचितमृदुगीतिगते ।
न शरणपालिनमिह बनमालिनमाकलयामि भवन्तमृते ॥ ४ ॥

श्रीमन्नीलगिरीन्द्रसुन्दरदरीसञ्चारिपञ्चाननः
श्रीभूमिसहितो जगज्जनहितो वन्दारु[4]वृन्दारकः ।
स्निग्धेन्दीवरवृन्दसोदरतनुस्तद्दृशा[5] तादृशा
लोकानुग्रहकारिणी मखभुजां[6] पायादपायाज्जगत् ॥ १५ ॥

---

1. ख. वन ।
2. क. हृत ।
3. ख. दिर ।
4. क हतोद्वन्दारु ।
5. क. तनुक्तन्दरदृशा ।
6. क. मखभुजां ।

द्वितीयः प्रबन्धः

धनाश्रीरागेण गीयते

जयतु जगदीश उपजलधितटचारी ।
नीलमणि धरणीधरकन्दरविचारी ॥
॥ ध्रुवपदमिदम् ॥

इन्दिराननलिनमधुर मधुपायी ।
शिशुकपट कल्पवट पत्रपुटशायी ॥ १ ॥

रोहिणीतनय[1] तनुरतनुरुचिधारी[2] ।
दितिज[3]वधकृतविबुधविविधनुतिहारी ॥ २ ॥

कलित[4]भद्राललितरूप उरुमायी ।
त्रिगुणमय जगदुदयकुशलभयदायी ॥ ३ ॥

नक्रवरदलनकर वक्रतनुशाली[5] ।
इन्द्रमणिरुचि कनकवसन वनमाली ॥ ४ ॥

यं वेदान् कवयो वदन्ति चतुरः श्रीवासुदेवादिका-
नाहुः साल्वत[6] पुङ्गवाः सुकृतिनो धर्मार्थकामामृतम् ।
श्रीनीलाचलकन्दरोदरभुवि व्यक्तं चतुर्द्धा स्थितं
तं वन्देमहि नन्दनन्दनतनुं राधाधवं माधवम् ॥ १६ ॥

---

1. ग. पुस्तकस्यारम्भः ।
2. ग. तनुरुचि ।
3. क. दिविज ।
   ग. द्विविधद ।
4. क. कलि ।
5. क.ग. चक्रतनुशाली ।
6. ग. सात्वत ।

तृतीयः प्रबन्धः

कल्याणरागेण गीयते

सरसिजलोचन सङ्कटमोचन। सकल रजनिचरकुलसङ्कोचन ॥
व्रजपुरमण्डन[1]।
पालय गोपपते[2]। कृपालय मामिह लोकगते ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

त्रिभुवनपालक वल्लववालक। घनरुचिकुञ्चितकुन्तलजालक ॥ २ ॥
रवितनयातट रङ्गकपटनट। राधावदनसुधारसलम्पट ॥ ३ ॥
नक्रविदारण गजपतितारण। निखिलचराचरपालन कारण ॥ ४ ॥
व्रजपुरमण्डन कालियदण्डन[3]। चरणानतजन-भयचयखण्डन ॥ ५ ॥
सुरपुरनाशक खलजनशासक। कंसमथन यदुवशविनाशक ॥ ६ ॥
गिरिवरधारक गोकुलतारक। अर्जुनसख यमलार्जुनतारक ॥ ७ ॥
त्वयि पुरपालिनि गुणगणशालिनि। चेतो मम रमते वनमालिनि ॥ ८ ॥

एकदा किल कलिन्दनन्दिनीतीरसीमसुषमावलोकिका[4]।
राधिका प्रियसखीगणाधिका निर्जगाम भवनात्समुत्सुका[5] ॥ १७ ॥

सातीपीनकुचभारसंनता सन्नतापमुपनीपपादपम्।
पादपङ्कजरुचा वसुन्धरां बन्धुरां विदधती[6] ययौ सती ॥ १८ ॥

तत्र पत्ररथ[7]चित्रकूजितं पूजितं कुसुमपल्लवैर्नवैः।
पूरितं फलभरोद्गमैद्रुमैर्नन्दनन्दनविलासमन्दिरम् ॥ १९ ॥

सातिनन्दन[8]मवेक्ष्य काननं शोभनं नयनचित्तलोभनम्।
व्याजहार वृषभानुनन्दना स्वां सखीमिति मनो[9]ऽभिनन्दना ॥ २० ॥

---

1. ख. व्रजपशुपालय।
   ग. व्रजपुरमण्डनपदस्योल्लेखोनास्ति।
2. ख. गोपगते।
3. ख.ग. कालीयदण्डन।
4. ग. वलोकिता।
5. क. समुत्सुका।
6. ग. पङ्कजरुणवसुन्धरां विदधति।
7. ख. पत्ररय।
8. ख सा तन्नन्दन।
9. ग. वनो।

॥ ७ ॥

चतुर्थः प्रबन्धः

आशावरीरागेण गीयते

रुचिरगन्धमलयगन्धबह-सुखावनीतलम् ।
विमलनीरसरिदधारत तरतरङ्गशीतलम् ॥
लोकय यमुनावनं लोकनापावनम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

नटनशालि किशलयालि[1]कोकिलकलकूजितम्[2] ।
कुसुमवृन्दमधुमरन्दरभसभृङ्ग[3]पूजितम् ॥ २ ॥

कलितमाल[4] नवतमालविटपिजालशोभनम् ।
विकचमल्लीकुसुमवल्लीसौरभभरलोभनम् ॥ ३ ॥

सदयलूनमृदुलसूनपल्लवशयनाचितम् ।
कुञ्जभवन-मञ्जुल-वनमाली-हरणोचितम्[5] ॥ ४ ॥

सखीवचोऽमृतमुदितं सुधाम्बुधेर्निपीय ताश्चकितचमूरुलोचनाः ।
परस्परं करमवलम्ब्य सस्मिता वनश्रियं ददृशुरतीव-विस्मिताः ॥ २१ ॥

निपीय कृष्णकैशोरलीलामृतरसासवम् ।
तद्भावावेशविवशा पुनः प्राह रहः सखीम् ॥ २२ ॥

---

1. क. किसलयालि ।
2. क कोकिलकूजितं
   ख. कोकिलकुर्जितम् ।
3. क.ख. रभसङ्ग ।
4. ग. कलितपाल ।
5. ख. हरिशोचितम् ।
   ग. हरिशोचितं ।

पञ्चम: प्रबन्ध:

आशावरीरागेण गीयते

किशलय[1]रागवती लतिका सखि कापि कुसुमकृतवेशा ।
चटुलरसालविटपमुपगूहति तनुलसदङ्कुरलेशा ॥
सुन्दरि पश्य निकुञ्जघने । फलभरनततरुपुञ्जजने ॥
॥ ध्रुवपदमिदम् ॥

कोकिलकाकलिकानुनयेन विधुतनवपल्लवहस्ताम् ।
अनुकूलयति कोऽपि तरुरन्तिकलतिकामनिलविहस्ताम् ॥ २ ॥

तर्जयतीव विरहितरुणी[2]जनमलिरवहुंकृतिः तारा[3] ।
कुसुमितवञ्जुलमञ्जरिका किल कलित[4]रुचिररुचिसारा ॥ ३ ॥

यामुनतरलतरङ्गकरम्बितमारुतधुतनवचूते ।
विलसति सति वनमालिनि सन्ततमृजुनि[5]करालयभूते ॥ ४ ॥

आनन्दं नन्दसूनोर्विदधदनुपदं क्रीड़तो गोपबालै-
र्नानाधातुप्रसूनाभरणविहरणस्थानविश्रामदानैः ।
वृन्दारण्यं सुपुण्यं कथमिव न बहु ब्रूमहे भूमहेतुं
यस्मिन् गुल्मादिजन्मापि हि[6] विहितनतिप्रार्थितं ब्रह्मणापि ॥ २३ ॥

तत्रचित्रकुसुमप्रसाधनं साधनं नयनसौख्यसम्पदः ।
श्रीमुकुन्दमभिनन्द्य सुन्दरी प्राह कापि सुमुखी सखीं[7] प्रति ॥२४॥

---

1. ग.क. किसलय ।
2 ख. तरुणा ।
3. ख. परा ।
4. क. किलत ।
5. ख. सन्ततमृदुनि ।
ग. सन्ततः मृत्युवि ।
6 ख. जन्मापीह ।
7. क. सुमुखीं सखीः ।

षष्ठः प्रबन्धः

मुखावरीरागेण गीयते

पश्यत नन्दकुमारं प्रणत सनन्दकुमारम्[1] ।
रुचिरतनुरुचिगञ्जितमारं मञ्जुकुसुमसुकुमारम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मुरलीवादनलोलं कुण्डलललितकपोलम् ।
कनकनिचयरुचिपोत[2] निचोलं विटपिविटपकृतदोलम् ॥ २ ॥

व्रजपुरबालकखेलं वदनविधुतविधुहेलम् ।
तपनसुतातटविहरणशीलं विधिविस्मापनलीलम् ॥ ३ ॥

तनुजितमसृणमसारं तरलहृदयमणिहारम् ।
वनमालिनमतिकरुणमुदारं तरुणसुभग[3]जनसारम्[4] ॥ ४ ॥

इति विविधविलासं चन्द्रिकाचारुहासं
पशुपनृपकुमारं पद्मभूशिल्पसारम् ।
वचनपटिमवत्यो वर्णयन्त्यो युवत्यो
विपिनभुवि न गेहं सस्मरुर्नापि देहम् ॥ २५ ॥

मुकुन्ददर्शनाकन्दवलत्कन्दर्पवेदनाम् ।
राधामालक्ष्य सुमुखी कापि प्राह सखीमिदम् ॥ २६ ॥

कारं कारं विहारं गगनभुवि सुखं सम्मुखं दिग्वधूना-
मत्यन्तं रागवत्या ननु जनितरुचिः प्रत्यगाशायुवत्या ।
एकान्ते रन्तुमेष त्वरयति तुरगानुल्लसद्गाढरागः
प्रौढानङ्गः पतङ्गश्चरमगिरिमहाकन्दरामन्दिराय ॥ २७ ॥

---

1. ख. प्रणमतनन्दकुमारम् ।
2 ए. पीत ।
3. ग. पुरुष ।
4. ख सारी ।

अथास्तु भूधरवरकन्दरोदरे
परिश्रमं शिशमयिषौ विभावसौ ।
मनोरथैः कथमपि जर्जरान्तरा
निजालयान्निववृतिरे मृगीदृशः ॥ २८ ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
गोपिकापूर्वानुरागो नाम प्रथमः सर्गः॥

द्वितीयः सर्गः

अथोषसि शशिप्रभाननघनस्तनप्रस्फुर-
त्सुमृष्टमणिकुण्डलोत्तरलतारहारस्रजः ।
व्रजाम्बुजविलोचनाः कलितगीतिका मूर्च्छनाः
स्खलत्कवरमल्लिका दधि ममन्थुरत्युत्सुकाः ॥ १ ॥

दधिमन्थनकर्मणीरिते निजदासीनिचये[1] सुतं सती ।
अपनिद्रयितुं स्पृहावती मधुरं नन्दवधूरवोचत ॥ २ ॥

सप्तमः प्रबन्धः

विभासरागेण गीयते

अजनि रजनिरियमपगतसारा । धूसरशितकरविलुलिततारा ।
माधव तात विसृज ते[2] शयनम् । विकचय चारु नलिननयनम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

लोकय रजनी परिहृतमोदम् । लोकमिथुनमुपयाति विनोदम् ॥ २ ॥

उषसि विनिद्रित सरसिजपत्रम् । कलयसि किं न नयननिजनेत्रम् ॥३॥

तरुशिखरोषितपत्ररथालि । कलकलनादमुखरमुखपाली ॥ ४ ॥

प्रकटय सुन्दर नटवरलीलाम् । नन्दनयनसुखकन्दलशीलाम् ॥ ५ ॥

मोहन तव मिलनाय सखायम् । त्वामुपगतबानुषसि सखायम् ॥ ६ ॥

पश्य विततमपि बलवदमित्रम् । ग्रसति तमोऽरुण इदमिति चित्रम्[3] ॥ ७ ॥

इति वनमालिनि वचनमुदितम् । शृणुत सुखं निजजनगीतम् ॥ ८ ॥

---

1. क. निजवासानिचये । ख. निजवाचानिलये ।
2. क. विसृजत ।
3. ख. रूणमिदमितिविचित्रम् ।

ग्रसति रविः क्व विधुन्तुदं
तुदन्नित्यथ सहसम्भ्रमनिद्रमुत्थितोऽयम् ।
विकृत विलोकनकौतुकी
जनन्या कथमपि बोधयितुं हरिर्न शेके[1] । ३ ॥

दरविकचसरोजपत्रनेत्रं शत[2] विधुविम्बविडम्बनीय[3] वक्त्रम् ।
विलुलदलकमण्डलं यशोदा सपदि निपीय दृशा भृशं तुतोष ॥ ४ ॥

अथ मन्मथदर्पहारिणं कतिभि[4]श्चित्सखिभिर्विहारिणम् ।
व्रजराजकुमारमङ्गनागतमालोक्य जगुस्तमङ्गनाः ॥ ५ ॥

अष्टमः प्रबन्धः

मङ्गलगुज्जरीरागेण गीयते

मृदितकुसुमचितचित्रितकेशम् ।
रत्नाभरणविचित्रितवेशम् ॥
सुमुखि विलोकय मोहनरूपम् ।
नयनमहोत्सवमप्रतिरूपम् ॥ ध्रुवपदमिदम् ॥ १ ॥

गोपतरुणमतिकरुणदृगन्तम् ।
अरुणरुचं[5] दिशि दिशि[6] विकिरन्तम् ॥ २ ॥

मणिमकराननकुण्डलगण्डम् ।
चूडाभरणशिखण्डिशिखण्डम् ॥ ३ ॥

शोणाधरदरनिद्रितवदनम् ।
शोभासमुदयमुद्रितमदनम्[7] ॥ ४ ।

---

1. क. हरिननशके ।
2. क.ग सत ।
3. ख. विधुविड़म्बनीय ।
4. ग. कुतभि ।
5. ग. अरुणरुचिं ।
6. ख. रुचिदिशि ।
7. क. निदनम् ।

चलितदृगञ्चललिलितकपोलम् ।
गोधनदोहनविहरणलोलम् ॥ ५ ॥

हंसकरणितचरणशतपत्रम् ।
शरणाजनगतकरुणासत्रम् ॥ ६ ॥

हलधरदामसुदामसमेतम् ।
पीतवसनवनमालीनमेतम् ॥ ७ ॥

मुरहरदरनिद्रालस्यवश्याङ्गभङ्गी-
श्चकितशिशुकुरङ्गीलोचनालोकयन्त्य[1] ।
विपुलपुलकपत्रा[2] विस्मयोत्फुल्लनेत्रा[3]
नयनफलविघातं[4] मेनिरे पक्ष्मपात्रम् ॥ ६ ॥

भगवानथ नन्दनन्दनः कृतमानुष्यतनुविड़म्बनः ।
निजगोधनदोहनस्थलं व्रजराजप्रणयादयानलम् ॥ ७ ॥

तत्र ता अतिवचोविचित्रिताः कृष्णमोषदिव मीलितेक्षणाः ।
धेनवो नवनवोदितस्पृहा नेत्रपत्रपुटकैश्चिरं पपुः ॥ ८ ॥

छन्दनीकलितचारुकन्धरः[5] सान्द्रनीरदकदम्बसोदरः ।
मोहनाय मनुजाकृतिर्गवां दोहनायसुरनायकोऽविशत् ॥ ९ ॥

दुग्धविन्दुचयचुम्बि सर्वतो मुग्धमच्युतकलेवरं वभौ ।
श्यामलोत्पलनिभं तमो निशि स्पष्टतारकितमम्वरं यथा ॥ १० ॥

समाप्य गोदोहनकर्ममोहनस्ततः कृतस्नानविलेपनाशनः ।
वनाय गन्तुं दधदुत्सुकं मनः समं वयस्यैर्निरियाय वेश्मनः ॥११ ॥

---

1. ख. लोकन्यन्तः ।
2. ग. पुलकगात्रा ।
3. ख. फूलनेत्रा ।
4. ख. विपातं ।
5. ख. कन्दिरः ।

राज्ञां ससैन्याति[1]भरातुराया गोरक्षणार्थं हि कृतावतारः ।
गोरक्षणार्थं पशुपालबालैः समं बहिर्मन्दिरतोऽच्युतोऽभूत् ॥ १२ ॥

मधुरमधुरबेणुभृङ्गशृङ्गध्वनीनां
विपिनगमनवेलामङ्गनानां मुरारेः ।
ब्रजपुरयुवतीनामन्वहं जानतीना-
मपि कुतुकवतीनां संभ्रमोऽभूदपूर्वः ॥ १३ ॥

मुक्तसामिकृतकृत्य[2] कुमारौ सुकुमारौ तनुकान्तिर्धूतमारौ ।
ययतुर्ब्रजलोचनाभिरामौ सविरामौ विपिनाय कृष्णरामौ ॥ १४ ॥

मुक्तसामिकृतकृत्य[3]सिद्धयस्त्यक्तदेहनिजगेहबुद्धयः ।
इन्दिराप्रणयिसुन्दराननं ता ननन्दुरवलोकितुं स्त्रियः ॥ १५ ॥

समुल्लसल्लोचनचारुपत्रं द्विजावलीकेशरराजिचित्रम् ।
निपीय गोविन्दमुखारविन्दं नेत्रालिभिः संततृपे न तासाम्[4]॥१६॥

घनं वृन्दाबनं प्राप्य कृष्णोऽनुयमुनातटम् ।
सुरभीनाशनश्चक्रे[5] सुरभीपालन[6]क्रमम् ॥ १७ ॥

नवमः प्रबन्धः

देशाख्यरागेण गीयते

हरिरपि मनुजविड़म्बनकारी । ब्रजपुरबालकसङ्गविहारी ॥
चारयति सुर[7] सुरभिनिकुरम्बम्[8] । अनुयमुनातटकेलिकदम्बम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. राज्ञां स्वसैन्याति ।
   ग. राजन्यसैन्याति ।
2. ग. घनसारशितिद्युति ।
3. ग. मुक्तसमिकृत्य ।
4. क.ख. १५-१६ श्लोकद्वयं नास्ति ।
5. ख. सुरभिनाशनं चक्रे ।
6. ख. पालनं ।
7. क. स्मर ।
   ग. स्म ।
8. क.ग. निकुरम्बं ।

सुरभितदिशि मलयाचलभवने । प्रसरति मन्दशिशिरतर[1]पवने ॥ २ ॥
कुसुमितफलितविटपिकुलभरिते । मधुरसलम्पटमधुपमुखरिते ॥ ३ ॥
क्वचिदपि रणयति मृदुतरमुरलीम् । गणयन्निव बहुवादनखुरलीम्[2] ॥ ४ ॥
शवलि धवलि बहुवर्णिनि[3] चित्रे । कुमुदे कालिहारिणि हरिनेत्रे ॥ ५ ॥
क्वचिदिति कलयति बचनममन्दम् । गहनगतं प्रतिगोधनवृन्दम् ॥ ६ ॥
क्वचिदपि नृत्यति गायति ललितम् । तालरागदिरुदस्वरमिलितम्[4] ॥ ७ ॥
धातुरचितबहुचित्रकशाली । किशलयनिचयरुचिरवनमाली ॥ ८ ॥

पुलिनरचितखेलाः पीतकौशेयचेलाः
व्रततिविततिदोलाः कन्टुकक्ष्वेलिलोलाः ।
लुलितकुसुममाला धेनुसन्दोहपाला
वनभुवि हरिणान्ते रेमिरे गोपबालाः ॥ १८ ॥

मिलितं केलिकंकेलिमूले कूले कलिन्दजाम् ।
गोविन्दं दर्शयन्मन्दमाह कोऽपि रहः सखा ॥ १९ ॥

दशमः प्रबन्धः

शङ्कराभरणरागेण गीयते

मोहन पश्य विभाकरतनया । त्वामनुसरति विहितबहुविनया ॥
कामिनी युवतीव सलीला । मन्थरगतिरतिशोभनशीला ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क.ख. शिशिरेतर ।
2. क. मुरलीं ।
3. ख. वर्णिलि ।
4. क. विरुदम्बरमिलितं ।

ललितवीचिकरकलितमुदारम् । रचयति विकचकमलमुपहारम् ॥ २ ॥
अरुणनलिनपदहंसकरणिता । सारससारविरुतमृदुभणिता ॥ ३ ॥
परिहितजलधरनीलनिचोला । प्रकटपुलिनजघनावृतलोला ॥ ४ ॥
इन्दीवरदलतरलदृगन्ता । कोकमिथुनघनकुचरभरकान्ता ॥ ५ ॥
ललितावर्त्तनाभिरभिरूपा । विविधकुसुमचयचित्रितरूपा ॥ ६ ॥
विकशितचारुवदनशतपत्रा । घनमधुपावलिमृगमदपत्रा ॥ ७ ॥
इतिवनमालिनमनुसखीगीतम् । सुखयतु सहृदयहृदयमुदीतम् ॥ ८ ॥

निशम्य सुहृदीरितां वचनचातुरीं माधवः
कुतूहलसुधाम्बुधौ निरवधौ निमग्नान्तरः ।
तरङ्गशतसंकुलां तरणिजां[1] प्रफुल्लोत्पलां
ददर्श भृशविस्मितः कुमुदकुन्दमन्दस्मितः ॥ २० ॥

इति प्रकटकैशोरैर्विहारैर्नन्दनन्दनः ।
अनुभूय वनानन्दं भवनाय मनो दधे ॥ २१ ॥

मृदितरुचिरवरांशौ मञ्जलस्वानवंशौ
वनकुसुमसुवेशौ कुञ्चितस्निग्धकेशौ ।
व्रजभुवमुपयातौ कल्पनापारिजातौ
पशुपयुवतितृष्णौ रेजतू रामकृष्णौ ॥ २२ ॥

मुकुन्दमरविन्दसुन्दरमुखं वीक्ष्य ताः
प्रपद्य[2] नयनोत्सवं पशुपसुभ्रुवः प्रेप्सितम् ।
उदञ्चिततनूरुहाः प्रमदगद्गदं सस्पृहा
जगुः परममङ्गलं व्रजपुरप्रवेशं हरेः ॥ २३ ॥

---

1. क. तणिजां । 2. ख. प्रपन्न ।

एकादशः प्रबन्धः

गौरीरागेण गीयते

विकसित[1] कुन्दकुसुमसमुदग्रकृतकुतुकवेशनरजनुरनुकारी ।
गुञ्जाफलभरमञ्जुलकलेवरनूपुररणितचरणयुगचारी ॥
प्रविशति गोकुलमयमघहारी,
प्रियसखि सुभगमजनि रजनीमुखमनुयमुनातटविपिनविहारी ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

गोधनघनखुररेणुविधूसरसरसिजसुन्दरनयनविसारी ।
समुदितशारदकैरवबान्धववदनमदन[2] रुचिहारी ॥ २ ॥

विविधधातुगणपत्रविचित्रित[3] कायकान्तिघनविजयविधायी ।
अधराधरितबन्धु[4] जीवद्युतिरतिशयलोकनयनसुखदायी ॥ ३ ॥

गोपमुरलीकलरवतरलितवल्लवयुवतीधृतिरतिविभ्रमशाली ।
शिरसि शिखण्डिशिखण्डसमुज्ज्वलकुसुमितचूल उरसि वनमाली ॥४॥

मुखविधुतविधूनां मुग्धगोधुग्वधूनां
प्रतिपदमितिगौरीरागगीतं निशम्य ।
अनुजनमनुगृह्णन्नुत्तरङ्गैरपाङ्गै-
रविशदवितृषस्ता मन्दिरं नन्दसूनुः ॥ २४ ॥

प्रतिदिनमिति केलिं हेलिकन्या प्रतीरे
सहसहजसुहृद्भिः प्रेमवद्भिर्[5] वितन्वन् ।
अधिधरणि पुराणः पूरुषः सोऽभिरेमे
व्रजपुरयुवतीनां चित्तचोरः किशोरः ॥ २५ ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
प्रचुरकैशोरलीलो नाम द्वितीयः सर्गः ।

---

1. ख.ग. विकशित ।
2. ख. बान्धवजन ।
3. ख. विचित्र ।
4. ग. अधरमृतेबन्धु ।
5. ग. प्रेमवर्त्ती ।

तृतीयः सर्गः

अथ वीतघनाघनाम्बरा रुचिरा हंसनिनादडम्बरा ।
वरदा पशुपालयोषितां शरदानन्दनकन्दमूरभूत् ॥ १॥

अमलसकलचञ्च[1]च्चन्द्रमःस्मेरवक्त्रा
दलितललितमन्दान्दोलराजीवनेत्रा ।
धृतविशदविभूषाविस्फुरत्काशहासा
शरदतनुत शौरेः[2] प्रेयसीव प्रमोदम् ॥ २ ॥

वीथौ वीथौ विचकिलकुलं फुल्लमुल्लासयन्तीं
सान्द्रैश्चान्द्रैः किरणनिकरैः काननं भासयन्तीम् ।
कामं कामं हृदि विदधतीं गोपसीमन्तिनीनां
दर्शं दर्शं शरदमुदितां माधवो[3] मोदमाप ॥ ३ ॥

मनोविनोदिनीं वीक्ष्य राधा साधारणश्रियम् ।
शरदं स्फुरदम्भोजमुखी प्राह सखीमिदम् ॥ ४ ॥

द्वादशः प्रवन्धः

मुखावरीरागेण गीयते

प्रमुदितकुमुदे प्रभवति कुमुदे प्रसरदमृतनिकरे ।
शुचिरुचिसघने शोभितगगने राजति रजनीकरे ॥
रमते शरदागमसमये । मम सखि मानसमधिकमये ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

विदलितनलिने मञ्जुलपुलिने यामुनविमलजले ।
विचकिलकलिते सौरभमिलिते कुसुमितविपिनतले ॥ २ ॥

---

1. ग. अमलकमलदच्च ।
2. ग. गौरेः ।
3. ग. साधवो ।

अवसर उचिते व्रजभुवि रचिते मनसिजनृपविजये ।
युवजनमहिते पङ्कजविरहिते[1] निर्जलजलदनिचये ॥ ३ ॥

इह मम वलते रतिरतिललिते निशि शशिकिरणसिते ।
यामुनविपिने शतदललपने[2] वनमालिनि दयिते ॥ ४ ॥

मधुरमधुरवंशी[3] निस्वनकेलिहंसा-
रवमवकलयन्ती कण्टकैरुल्लसन्ती ।
मदनमदविलोला कृष्णकैशोरलीला
ह्रसमतिरिति दूतीमाह सप्रेमराधा ॥ ५ ॥

त्रयोदशः प्रबन्धः

आशावरीरागेण गीयते

मधुमथनवचनमधुपानहतचेतना ।
स्वपिमि निशि न शशिकरपृथुदवथुवेदना ॥
दूति मम कलय समयं न जीवामि खलु तं विना ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

स्मरणमुपयाति मम सततमपि काननम् ।
किं च संचलदलकमधुरमधुहाननम् ॥ २ ॥

वपुषि विदधामि न सुधाशिशिरचन्दनम् ।
हरिविरहदाव[4]दहनेन न हि नन्दनम् ॥ ३ ॥

मधुरमुरलीकलितगीतिरतिकोमला ।
श्रवणपथमनिशमनुशीलयति केवला ॥ ४ ॥

---

1. ग. पङ्कविरहिते ।
2. क.ख. शतकतलपने—पदस्योल्लेखो नास्ति ।
3. ग. वाणी ।
4. ख वद ।

सखि निखिलमिदमफलममलमणिमण्डनम् ।
नन्दसुतरतिकृत[1]विषयरसखण्डनम् ॥ ५ ॥

सरसवृषभानुतनयावचनषट्पदी ।
जयति वनमालिपदकमलमनुषट्पदी ॥ ६ ॥

अयि तं दयितं विना मदीयं खिल तामेति मनो मनोरथेन ।
मम दर्शय दर्शनीयहासं नयानानन्दमुकुन्दसुन्दरास्यम् ॥ ६ ॥

दूति केलिवृषभानुनन्दिनीवाचमाचकलदर्थतस्ततः ।
इन्दिरारमणकेलिमन्दिरं सा कालिन्दतनयावनं ययौ ॥ ७ ॥

तत्र कोटिकुसुमायुधश्रियं सा श्रियः[2] प्रियतमं तमैक्षत ।
राधिका[3]प्रणयलालस भृशं नीलनीरज दृशं कृशोदरी ॥ ८ ॥

सारसालसविशाललोचनं सारसालसदनूतमाननम् ।
सारसाभिरुततीरकानने सा रसादिदमुवाच दूतिका ॥ ९।

चतुर्द्दशः प्रबन्धः

मारुरागेण[4] गीयते

अविरतविगलितनयनजलार्जितजर्जरभावदुकूला ।
न वदति किंचन रहसि सखीजनमपि कुतुक[5]प्रतिकूला ।
माधव तव विरहे वत राधा,
ध्यायति किमपि निमीलितलोचनमुपचितमनसिजवाधा ॥
॥ ध्रुवपदमिदम् ॥ १॥

अशनवसनमपि विषविषधरमिव पश्यति नश्यति लीला ।
दक्षिणमनिलमनलमिव[6] सम्प्रति परिहरति भ्रमशीला ॥ २ ॥

---

1. क. रस्कृत ।
2. ख. सा श्रियः—पदस्योल्लेखो नास्ति ।
3. ख. राविका ।
4. ख. सारीरागेण ।
5. ख. कुतक ।
6. ग. मवलकमिव।

प्रणयिजनाय मनागपि नेच्छति नयनाञ्चलमपि दातुम् ।
यतते सततमुपायशतैरपि रजनीकरमपि धातुम् ॥ ३ ॥

सचल[1]नलिनदलसञ्चयकल्पिततल्पगसुभगशरीरा ।
स्मरति भवन्तमृते वनमालिनमपरं न परमधीरा ॥ ४ ॥

उड्डियेत नु पक्ष्मपातपवनैरेषा विशेषात्तनु-
स्ताम्यन्तीव निमेषलेशरहितंसख्याननं वीक्ष्यते ।
नासातूलविकम्पितूलकलनादुन्नीयते जीवनं
दूरेऽस्याः स्मरदावदाहशमनी शीलोपचारस्थितिः ॥ १० ॥

अये राधासाधारण विरहवाधातिविवशा
निरानन्दावृन्दावनमदनवन्दारुरनिशम् ।
त्वयि श्रीशेऽधीशे भवति वरवैशे मम सखी
कथं दीनां लीनां विपदि विधिहीनां न दयसे ॥ ११ ॥

भुयो भूयः पशुपयुवती भारतीचारुभावं
भावं भावं प्रणयलहरीपूरपूर्णान्तरङ्गः ।
तत्प्रत्यङ्गाहितमतिरतिप्रेमसन्दर्भगर्भं
दूतीं राधामनुमृदुपदां वाचमूचे मुकुन्दः ॥ १२ ॥

पञ्चदशः प्रबन्धः

केदाररागेण गीयते

यावरसा[2]रुणतमपदपद्मा । विलसति रूपवती किमु पद्मा[3] ।
सरसिजमुखि कनकरुचिचोरी । त्यजति मनो मम गोपकिशोरी ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क ग. सजल ।
2. ख. यावराया ।
3. क. पद्माः ।

उरुविडम्बितकरिकररम्भा । विहरति कुतुकवती किमु रम्भा ॥ २ ॥
विपुलजघनतनुतरकटिदेशा । खेलति रतिरिव धृतिहरवेशा ॥ ३ ॥
पीवरकुचभरमञ्जुलहारा । सा मम मनसिजबन्धनकारा ॥ ४ ॥
मुखविजितामलशशधरविम्बा । परिसरविलसदलकनिकुरम्बा ॥ ५ ॥
भ्रमरिततारकमल[1]दलनेत्रा । सुन्दरतनुतनुपरिहितनेत्रा ॥ ६ ॥
करकरदनरुचिकैरवहासा । नयनमनोहरबहुलविलासा[2] ॥ ७ ॥
इति वनमालिन उदितमुदारम् । रसयतु रसिकजनं रससारम् ॥ ८ ॥

इदमुदीरितवत्यथ मन्मथग्रहगृहीततया[3] मधुसूदने ।
अभिसिसारयिषुर्वृषभानुजां सपदि सानुससार तदन्तिकम् ॥१३॥

जलरुहदलतल्पे निःसहाङ्गीं शयानां
निजगमनविलम्बे संशयानां सखीं सा ।
मधुपतिरतिलग्नामाधिपाथोधिमग्ना-
ममितमिति मुकुन्द प्रेमबन्धं वभाषे ॥ १४ ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये राधाविरहवाधावतारो नाम तृतीयः सर्गः ॥

---

1. ख. भ्रमरितपरकमल ।
2. ख. वहुविलासा ।
3. क.ख. मन्मथगृहीततया ।

चतुर्थः सर्गः

ततो दूतीकृतानन्दमुकुन्दरतिदायिनी ।
उत्कण्ठितव्रजजनी[1] रजनी समजृम्भत[2] ॥ १ ॥

अथोदयधराधरारुणपरार्द्ध्यचूडामणिः
समानवरवर्णिनीमुखसमानवर्णाकृतिः ।
दिगम्बुजमुखीमुखे घृसृणपङ्कबिन्दूयितो
गतो नयनगोचरं तुहिनभानुराभासत ॥ २ ॥

क्रमेण गगनाङ्गणे रजनिजानिराजो निजैः
करैः प्रसृमरैर्दिशो दश यशोभरैः पूरयन् ।
दधौ सकलमण्डलं स कलयन्नलं सौहृदं
जगत्त्रयजयोद्यमे मदनराजसाहायकम्[3] ॥ ३ ॥

व्योम्नि मण्डलमखण्डमैन्दवं कुन्दकन्दुक[4]मिवाङ्गजन्मनः ।
लोकयन्नधिक[5]कोकशोकदं सम्मदं[6]मनसि नन्दनन्दनः ॥ ४ ॥

पश्यंश्चान्द्रीमसमसुषमां प्रौढकन्दर्पदर्प-
ध्वंसो वंशीवलितवदनः कुन्दमन्दस्मितश्रीः ।
गौरीसेवाफलमविकलं दित्सुरत्युत्सुकानां
गोपस्त्रीणां श्रवणमधुरं संजगौ कञ्जनेत्रः ॥ ५ ॥

निपीय कृष्णमुरलीकलमुन्मद[7]मानसाः ।
दिदृक्षवो वनमहमहंपूर्विकया ययुः ॥ ६ ॥

---

1. क. उत्कण्ठितव्रजनी ।
   ग. उत्कण्ठितवज्जनी ।
2. ग. समजृम्भतः ।
3. ग. साहायनं ।
4. क. कुन्दकुन्दक ।
5. ग. लोकयन्नधित ।
6. ख. समदं ।
7. क. कलमन्मद् ।

यस्याः पञ्चममाधुरीपरिचयादानन्दनिष्पन्दितां
कालन्दी[1]दधतीन्द्रनीलमणिभिर्बद्धेव भूमी भवेत्[2] ।
ग्रावाणः करकी भवन्ति तरवो मध्वासवं प्रस्तुव-
न्त्येषा चेन्मुरली मुरद्विषि तदा का नागरीणां गतिः ॥ ७ ॥

चलपृथुलनितम्बालोलवक्षोजकुम्भा-
श्चकितचटुलताराश्चञ्चलस्वच्छहाराः ।
रणितचरणभूषा रत्नकाञ्चो सघोषा ।
जवनगतिसमेता जग्मुरेकैकमेताः ॥ ८ ॥

षोड़शः प्रबन्धः

भैरवरागेण गीयते

त्वरितमुपैदपि पृथुलनितम्बा तनुतनुसंकुलपुलककदम्बा ।
कापि मधुमथनम् । अलभत गोकुलविपुलधनम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

करधृतविगलितकुन्तलहारा । त्रुटितघनस्तनतटमणिहारा ॥ २ ॥

एकनयनकृतकज्जलसङ्गा । गोपयुवतिरतिभावतरङ्गा ॥ ३ ॥

एकचरणधृतयावकरागा, । समुदिततदितरविषयविरागा ॥ ४ ॥

चिरमनवस्थित[3]परिहृतदोहा । मृदुमुरलीरवसमुचितमोहा ॥ ५ ॥

सामिरचितकुचमृगमदपत्रा । अतुलचलत्कृतितरलितनेत्रा ॥ ६ ॥

प्रतिपदविगलदलङ्कृतिसारा । मदनमदाहितविविध[4]विकारा ॥ ७ ॥

अपदनिवेशितविमलविभूषा । वनमालिनमनुधृत[5]परितोषा ॥ ८ ॥

---

1. ग. कालिन्दी ।
2. ख. भूमिर्भवत् ।
3. क.ग. चिरमनवश्रित ।
4. ग. मदाहितविकृतविविध ।
5. ग. मनुधृति ।

निरीक्ष्य नवयौवतं सविधमागतं माधवः
स सर्वहृदयेशयोऽप्यतनुभावगर्भं हसन् ।
उवाच घनकाननानुगमकारणं प्रश्रगाः
पुरःसरमसत्वरं वचनचातुरीपारगः ॥ ९ ॥

सप्तदशः प्रबन्धः

मारूधनासी[1] रागेण गीयते

रजनिरजनि किल भीषणवृककुलसंकुलसकलदिगन्ता ।
व्रजत ततो व्रजपुरमविलम्बितमियमपनीतिरनन्ता ॥
यमुनाकूले घनतरुजाले ।
किमिति समागता अखिलगोकुलयुवतय उरुभयकाले ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

वनमपि कुसुमितमिदमवलोकितमिन्दुकिरणकृतशोभम् ।
यामुनपवनचलाचलपल्लव समुचितवल्लभलोभम् ॥ २ ॥

निगदत घनगहनागमकारणमपि कुशलं भवतीनाम् ।
सम्प्रति वत पुरमाकलयामि सकलयुवतीजनहीनाम् ॥ ३ ॥

परिहृतपतिसुतबान्धवजनशतमनुचितमनुवनयानम् ।
उपपतिरतिरतिनिन्दिततापदमनुपदनरकनिदानम् ॥ ४ ॥

अयि मयि भाववशेन कुशेशयदृश इममकुरुत रागम् ।
उचितमिदं किल सकलजनानामयि विदधति भृशमनुरागम् ॥ ५ ॥

पतिपदसेवनमेव युवतिजनसुकृतमिति श्रुतिगीतम् ।
नापि निपीतचरं श्रुतिचुलुकितमपचितमहदुपनीतम् ॥ ६ ॥

---

1. ख. मारिधनाश्री ।

प्रेयसि सागसि किमुत निरागसि चरितमिदं न सतीनाम् ।
साम्प्रतमपि तु करोति निरोधनमिह परलोकगतीनाम् ॥ ७ ॥

इति वनमालिवचनरचनं व्रजयुवतिरतिप्रदशीलम् ।
रसयतु रसिकजनं जनरञ्जनमपिहितभावसलीलम् ॥ ८ ॥

इति ता गुणैरनल्पाः सुरतरुकल्पादिधूतसंकल्पाः[1]
रुचिराञ्चितरतिरम्भा विफलारम्भा विषादमासेदुः ॥१० ॥

विशेषविज्ञा अपि वाचि साचीकृताननेनाथ हरिं नताङ्ग्यः ।
तरङ्गितापाङ्गविलोकनेन मन्दाक्षमन्दाक्षरमित्यवोचन् ॥ ११ ॥

अष्टादशः प्रबन्धः

भैरवरागेण गीयते

मा निगद परुषपदमेवमदयोदयम् ।
भवति विमुखे भवति विषमशरतो[2]भयम् ।
नाथ तव चरणपद्मम् । शरणमुपयाम चिरनिरतपद्मम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

भवदधरमधुरमधुलोभहृतचेतनम् ।
त्वरितमागतमहह परिवृर्तनिकेतनम् ॥ २ ॥

अलिकलुलदलककुलममलमणिकुण्डलम् ।
मोहयति तव लसित हसित मुख[3]मण्डलम् ॥ ३ ॥

विजितकरिशुण्ढभुजदण्डयुगशोभनम् ।
कलयति कलावतीजननयनलोभनम् ॥ ४ ॥

---

1. ख. संकल्पा ।
2 ख. विशमशतो ।
ग. विषमगरलो ।
3. क.ख. मुण्ड ।

त्वयि दधति जगति कृतिनोऽतिरतिमुत्तमे ।
प्रियसुहृदि सकलहृदि वसति सुरसत्तमे ॥ ५ ॥

शमय समयासहनतनुदहनमङ्गजम् ।
देहि कुचकलशमनुसर सरसकरपङ्कजम् ॥ ६ ॥

हरनयनकुण्डहुतदेहमपि सायुधम् ।
जीवयसि रसिक कलयापि कुसुमायुधम् ॥ ७ ॥

व्रजयुवतिकथितमिति जयति वनमालिने ।
सततमिदमोयरतिकन्द वन[1]शालिने ॥ ८ ॥

रूपं केलिकलाविलाससदनं कन्दर्पदर्पापहं[2]
वंशी शंसति पञ्चमं कलयते भ्रूवल्लरीविभ्रमम् ।
बिम्बं पूर्णतमं विधोरिदमिति प्रत्येकमुन्मादकं
सर्वं चेदिह निर्वहे[3]कुलवधूकौलव्रतं नः कथम् ॥ १२ ॥

नेत्रं नोपहृतं रमारमण ते लावण्यसारश्रिया
नासाश्वाससमीरसौरभभरे[4] लुब्धा रसज्ञाधरे ।
श्रोत्रं वेणुरवेऽङ्गसङ्गमसुखे त्वक्ते चरित्रे[5] चिरं
चित्तं नृत्यति सर्वमिन्द्रियफलं त्वय्येव नः साम्प्रतम् ॥१३॥

कुतुकभरनिरस्ता मन्मथोन्माथिनीस्ता
हरिरिति निगदन्तीः कुन्ददन्तीर्विहस्ताः[6] ।
सदयहृदयमङ्गीकृत्य नृत्यत्कुरङ्गी-
चपलचटुलनेत्राः प्रीणयामास रामाः ॥ १४ ॥

पुलीने नलिनाक्षीणां व्रजस्त्रीणां मनोभवम् ।
कृष्णः पुष्णन्[7]नवनवं रासोत्सवमवर्त्तयत् ॥ १५ ॥

---

1. ग. सततमिद मारयति कन्दलन ।
2. ख. कन्दर्पगर्वापहं ।
3. ग. निर्वहेत् ।
4. ख. सोरभभरे ।
5. ख. चरित्र ।
6. ख. कुन्ददन्तीरदस्ताः ।
7. ख. पुष्णन ।

ऊनविंशः प्रबन्धः

कर्णाटरागेण गीयते

जलतरङ्गसङ्गि[1]सुखशीतकैरवसुरभितमृदुपवने ।
शारदसकलकलानिधिमण्डलमण्डितयामुनपुलिनवने ॥
मुररिपुरकुरुत रासविलासम् ।
व्रजतरुणीजनवदनविलासम्[2] ॥ ध्रुवपदमिदम् ॥ १ ॥

केलिकलाकुलगोकुलनागर[3]वेणुरणितनवकुञ्जचने ।
हरिपरिरम्भण[4]सम्भ्रमकृतरववल्लवरमणीमणिरसने ॥ २ ॥

मृदुतरतल्पितनिजकरकल्पितकुसुमनिचितसैकतशयने ।
अनुपममधुरिमकुसुमसमूहविलोभितमोपतरुणनयने ॥ ३ ॥

त्रिभुवनविजयविजृम्भितमनसिजपूजनपरिजनरतिसदने ।
इह विहरति वनमालिनि शरदृतुगुणवति युवतिहृदयमदने ॥ ४ ॥

एकैकान्तरकान्तसुन्दरतनुव्यूहं वितन्वन्नयं[5]
तन्वङ्गीभिरनङ्गरङ्गरसिको रेमे रमावल्लभः ।
मध्ये रासविलासमण्डलमलं[6]सम्मानयन्माधुरो-
मिन्दोः सान्द्रसुधानिधानवसतेः कर्पूरपूरश्रियम् ॥ १६ ॥

विंशः प्रबन्धः

वसन्तरागेण गीयते

मोहनवपुरुपगूहनसमुच्छ्रितसजलजलदघनतड़िदुपमा ।
हरिमुखसकलकलानिधिनिजमुखकमलतुलनयतमानतमा[7] ॥
काचन मुररिपुणा । अरमत सौरतनयनिपुणा[8] ॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ग. तरलतरङ्गसङ्ग ।
   ख. जलरङ्गसङ्गी ।
2. ग. विकाशं ।
3. क.ख. कुलनागर ।
4. क.ख. हरिरम्भण ।
5. ख. वितन्वन्नवं ।
6. ग. मण्डनमलं ।
7. ख. पतमानतमा ।
8. क.ख. नयरिपुणा ।

॥ २९ ॥

नन्दतनयकृतचन्दनवृतसहमृगमद[1]लेपनतनुसुषमा ।
शितकरकिरणगणद्विगुणीकृतसौभगफुल्लकवरकुसुमा[2] ॥ २ ॥

मधुरतराधरमधुरसलम्पटनटवरभावकृतावगमा ।
समुदितशीत्कृतविपुलकचित[3]तनुतनुरति[4]कनकप्रतिमा ॥ ३ ॥

कलितनखाङ्कपयोधरशङ्करपदकृतगुणगरिमा ।
सन्ततमपि वनमालिनि विरचितनयननलिनपूजननियमा[5]॥ ४ ॥

हरिणा हरिणाक्षीणां परिक्षीणां मनोरुजम् ।
सृजन्निवागमत्तासां सुभगं मन्दतामदः ॥ १७ ॥

श्रीगोविन्दपदारविन्दविगलन्माध्वीरसाप्लावित-[6]
स्वान्ताः कान्तनिशान्तविस्मृतिजुषो बाला[7]विलासालसाः
ताः सौन्दर्य्यमदेन गोपतरुणं तं मन्यमानाः परं
श्रीशं कारणमानुषं निजवशं तत्तादृशं मेनिरे ॥ १८ ॥

तासां सौभगगर्वपर्वतभिदं देवेन्द्रभावं भज-
न्नन्तर्य्यामितयाखिलं करतलन्यस्तामलं[8]लोकयन्
श्रुत्वा[9] दूतिकया निवेदितचरं प्रेमाणमस्याः परं
राधायाः प्रणयाय सार्द्धमनया सोऽन्तर्दधे माधवः ॥१९॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
विलासवर्णने कामितराधामाधवो नाम चतुर्थः सर्गः ।

●

---

1. ख. चन्दनमृगमद ।
   ग. चन्दनसहवृतमृगमद ।
2. ग. फुल्लकरकुसुमा ।
3. ग. चित्त ।
4. ख. चिततनुरति ।
5. ग. पदस्योल्लेखो नास्ति ।
6. क. मध्वारसाप्लावित ।
   ख. मध्वासवाप्लावित ।
7. ख वामा ।
8. ख. करतलन्यस्तालकं ।
9. क. सृत्वा ।
   ग. स्मृत्वा ।

पञ्चमः सर्गः

अन्तर्हितेऽथ दयिते सह तेन तासां
रासादरो निववृते सहसावशानाम्[1] ।
संतप्यमानमनसां तदनादरेण
चिन्तापि सन्ततमा ववृधे[2]दरेण ॥ १ ॥

गाढध्वान्तं चेतसि रुढं द्रढ़यन्ती
तासां कृष्णस्याननचन्द्रानवलोकात् ।
शोकं कोकस्त्रीषु गतं विभजन्ती[3]
दुस्थावस्था कापि तदानीं प्रतिपेदे[4] ॥ २ ॥

अथ सा ब्रजपुरवनितातितिरुपजनिताच्युताधिकप्रियता ।
विधिनिन्दनप्रधानं तद्गुणगानं चकारोच्चैः ॥ ३ ॥

एकत्रिंशः प्रबन्धः

सौराष्ट्रगुज्जरीरागेण गीयते

नन्दनन्दनमृदुलसुन्दरकुन्दहासम् ।
हरि हरि वदनविधुमिदमियमपि तिलकुसुमनासम् ॥
लोकलोचनगोचरीकृतपरमशोभम् ।
हरि हरि त्वरिततरमपनीतवानसि जनितलोभम् ॥
दुर्विधे तव किं विधेयं मनसि जातम् ।
हरि हरि विदधतो गोपयौवत[5] कुलिशपातम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. सहसावसानम् ।
2. ख. सन्ततमाववृधे ।
3. क. विभवजन्ती ।
   ग. सम्विभजन्ती ।
4. ख. प्रतिपदे ।
5. ख. यौवति ।

निर्दयं तव हृदयमभिनव कामदेवम् ।
हरि हरि न चिरमिव परिदाय तिरयसि कृष्णमेवम् ।
कितव तव कलयाम किल भवभङ्गकामम् ।
हरि हरि यदिह विहरसि रहसि युवतीरतिरङ्गवामम् ॥ २ ॥

मदनमञ्जुलचापतापदमल्लिमालम् ।
हरि हरि विलसदर्द्ध[1]शशाङ्कशङ्कितचारुभालम् ।
मकरकुण्डलमण्डितामलगण्डदेशम् ।
हरि हरि मिलति हृदि हरिरूपमद्भुतरुचिरवेशम्[2] ॥ ३ ॥

किं नु भूषणमहह हेरिपरिभाव्यमानम् ।
हरि हरि तपति हृदि नोऽनुपमपरिभवदुर्निदानम् ।
विदितमेव हि जगति नो हरिरखिलवित्तम् ।
हरि हरि सततमपि वनमालिपदयुगचुम्बिचित्तम् ॥ ४ ॥

इति दैवविनिन्दनक्रमं व्रजनारीपरिषद्विधाय सा ।
अकृतप्रकृतोपयोगी यद्विपिने नन्दतनुजमार्गणम् ॥ ४ ॥

निकुञ्जपुञ्जेषु तमालमालया घनान्धकारेषु वनान्तरेष्वपि ।
वभूव नद्यास्तटभूषु[3]च प्रियं विचिन्वतीनां भृशप्रियं दृशोः ॥५॥

यो वाचो मनसोऽप्यगोचरतया वेदान्तसिद्धान्ततो[4]
यश्चाकाशवदन्तरे बहिरपि व्याप्यस्थित: सर्वत: ।
भक्त्या केवलयापि यं प्रवलया पश्यन्ति नैकान्तिन-
स्तं कान्तं मृगयन्ति हन्त विपिने कान्ता अहो गोदुहाम्[5] ॥

---

1. ख. विलसदर्द्धि ।
   ग. विलसदुद्ध ।
2. ख. रुचिरकेशम् ।
3. ख. नद्यास्तचभूषु ।
4. ख. वेदान्तसिद्धान्तिनां ।
5. क. गोगुहां ।
   ख. गागुहाम् ।

अनन्तरं ताः प्रमदाः पृथग्विधाः सचेतनाचेतनबोधदुर्विधाः ।
जगुः[1] प्रणामाञ्जलिबन्धबन्धुराः[2] स्मरातुरास्तास्तरुवीरुधः प्रति ।७।

द्वात्रिंशः प्रबन्धः

आहारीरागेण गीयते

चलदल सविधमुपेतम् । नयनमनोहरमेतम् ।
लोकितवानसि[3] कामम् । नन्दतनयमभिरामम् ।।
अथ कथमपि विपिनान्ते । तमिह लभेमहि कान्ते[4] ।।
॥ ध्रुवपदमिदम् ॥ १ ॥

वननिकटे तव[5] यातम् । मणिमयभूषणजातम् ।
वद मदनाधिकरूपम् । मेदुरमुदिरसरूपम् ॥ २ ।

चम्पक कुरुवककान्तम् । निगदत मदननितान्तम् ।
मालतीमाधवसङ्गम् । तव कलये लसदङ्गम् ॥ ३ ॥

तरुणतमालसखायम् । कथय तवामितमायम् ।
तरुणकरुणसुखकन्दम् । वदसि न किमिति मुकुन्दम् ॥ ४ ॥

चूतयुवतीधृतिचोरम् । कलयसि नन्दकिशोरम् ।
वकुल विकलय मनोजम् । प्रकटय नन्दतनूजम् ॥ ५ ॥

प्रणमतु केलिकदम्बम् । वल्लवयुवतिकदम्बम् ।
स हि हरिमुखविधुविम्बम् । दर्शयतादविलम्बम् ॥ ६ ॥

तुलसि लुलसि हरिवत्से । किं नो ऽनतमभिधत्से ।
नूनं त्वयि निरतन्तम् । तरयसि रहसि रमन्तम् ॥ ७ ॥

---

1. ख. जिगुः ।
2. क. वन्धुवन्धुराः ।
3. क.ख. लोहितवानसि ।
4. ख. कान्तम् ।
5. ग. वटनिकटतनु ।

केसरकुसुमविलासम् । कलयसि मृदुमृदुहासम् ।
वद मदनभ्रमशाली । क्व नु विहरति वनमाली ॥ ८ ॥

तदङ्गनवसङ्गम - प्रणयभङ्ग - भीतात्मनां
ननाम सकलः कलानिधिरपि प्रियं भावुकः ।
परोपकरणव्रतास्तरुलता विनोदायनो[1]
मनुजगतसुन्दरं व्रजपुरन्दरं शंसत ॥ ८ ॥

सञ्चरन्मुखसमीरचातुरी चारवं मधुरवंशिकारवम् ।
का नु[2] नागरवरस्य शृण्वती धारयेत्कुलवती कुलव्रतम् ॥ ९ ॥

इति ब्रुवाणा कुसुमेषुबाणाहता लतावृक्षमवेक्ष्यमाणाः ।
दयादृतानां[3] वनदेवतानामवर्त्तयन्नस्तु[4] भृशं कृशाङ्ग्यः[5] ॥ १० ॥

लीलाभिरामीरविलासिनीनां मनो हृतं[6] नन्दसुतेन[7] याभिः ।
तदातदाकारितचेतसस्तास्तास्तास्तदीया जगृहुः समस्ताः ॥ ११ ॥

त्रयोविंशः प्रबन्धः

चिन्ताकेदाररागेण गीयते

काचन हरिरहमिति मितिमकुरुत[8] कामपि पूतनयन्ती ।
पृथुलतदीयपयोधररसभरपानमिवारचयन्ती ॥
रासे हृतमतिना । मुषिता गोकुलपतिना ॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ग. विनोयनो ।
2. ग. काह ।
3. ख. द्वयोद्दतानां ।
4. ख. वर्त्तयन्मस्तु ।
5. ख. कृशाङ्गां ।
   ग. कृशाङ्गीः ।
6. ख. मनोहृतं ।
7. ख. नन्दसुतं न ।
   क. नन्दसुन ।
8. ख. मितिकुरुत ।
   ग. मितिमुकुरुत ।
9. क.ख. हृतमना ।

कापि वकायितसहजसखीजनमजनि भृशं दमयन्ती ।
वत्सायिततनूमपरामपि[1] तनुरनुविजनं विनयन्ती ॥ २ ॥

कापि चपलपदपल्लवदलखवालकिता शकटन्तीम् ।
कामपि गोकुलसुतनुमरुणचरणेन निरास[2]रटन्तीम् ॥ ३ ॥

सुमुखी वधान दधानमनयमविनीतं हृतनवनीतम् ।
कामपि कापि वचनमिति कथयति मधुपतिमनुसमुदितम्[3] ॥ ४ ॥

काचन चरणरणित-नूपुरमकृतनटनपटिमानम् ।
हृदि[4] हरिभूयमुपेतवती खलु रचित[5]सखीबहुमानम् ॥ ५ ॥

गायति कापि मधुरपदमुन्मदहृदनुगुणं[6] क्वणयन्ती ।
वंशीमथ मृदु शंसति तामनु[7] काचन बहुगणयन्ती[8] ॥ ६ ॥

कापि धरणिधरधारणडम्बरमम्बरमनुरचयन्ती ।
त्यजत पुरन्दरकोपकृतं दरमिति विशदं निगदन्ती ॥ ७ ॥

काचन काञ्चनवलयविचित्रितवेत्रकलितपशुभीतिम् ।
अनुविदधे वनमालिललितसुरभीगणचारणरीतिम् ॥ ८ ॥

इति विस्मृतनिज शीलाः[9] प्रियतमलीलानुकारपरितुष्टाः[10] ।
मुरहरवियोगबाधामतिदुःसाधां[11] क्षणं न ता विविदुः ॥ १२ ॥

वनान्तरेऽनन्तरमेवमुन्मदाः पदानि शौरे विशदानि कानिचित् ।
निरीक्षमाणास्त्वरसा रसादिदं परस्परं प्रोचुरधीरलोचनाः ॥ १३ ॥

---

1. क.ख तनुमरामपि ।
2. ग. निराश ।
3. क. समुदितम् ।
4. ख. हरि ।
5. क.ख. चरत ।
6. ग. हृदसगुणं ।
7 ख. शंसतिमनु ।
8. ख. वहुगुणयन्ती ।
9. ख. निजशिलाः ।
10. ग. परितृष्टः ।
11. ग. दुःसाध्यं ।

अये मयेदं परिचीयते पदं पदं यदम्भोजयवादिलक्ष्मणम् ।
क्षणान्तरेऽन्तर्दधतः सहैकया कयापि शौरेश्चरतो वने वने ॥ १४ ॥

अत्रासीत्कुसुमप्रसाधनविधिस्तस्याः वयस्याः प्रियः
सौभाग्यैकनिधेर्विधेय इव तामत्रानुनिन्ये प्रियः[1] ।
अत्रारीरमदुत्तमां प्रियतमां कृष्णः सतृष्णश्चिरं
शश्वत्पश्यत सर्वमेव तदिदं तल्लक्षणैर्लक्ष्यते ॥ १५ ॥

इति निर्वर्णयन्तीनां नयन्तीनां मनः[2]पथम् ।
गहने मृगयन्तीनां हरिमासीत्परिश्रमः ॥ १६ ॥

अथ ताः स्मरशरभिन्नाश्चिरपरिखिन्नाः समन्ततः खिन्नाः ।
मुरहरविरहविषण्णा पुलिननिषण्णाः जगुर्मधुरम् ॥ १७ ॥

चतुर्विंशः प्रबन्धः

वङ्गलाश्रीरागेण गीयते

तव जनुरनुकृतकपटगोपनटवेशं रमयति घोषम् ।
स भवानिह भवदीयजनेषु भजति किमिति स्मृतिमोषम् ॥
माधव भव शरणम् । नय नो नयनोत्सव तव चरणम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

स्मरगुरुतापनयननयनाञ्चल[3]मञ्चय नो रमणीयम् ।
कलय न भवदवलोकनलालसयुवतीगणं भ्रमणीयम् ॥ २ ॥
व्रजजनरञ्जन कञ्जनयन तव वदनसुधाकरबिम्बम् ।
दर्पकदर्पहरण मृदुलस्मित मुदयतु रहितविलम्बम् ॥ ३ ॥

वद वदनाम्बुज मधुरमधुपम वचनमकिञ्चनवित्तम् ।
भवदधरामृतरतिरपि मदयति चलरमणीमणिचित्तम् ॥ ४ ॥

---

1. ख. तामत्रानुनि येऽपि यः । 3. ख. गुरुतापनयनाञ्चल ।
2. ग. पुनः ।

वदनविलोकनमुषितविलोचन[1]मह्निगहनवनयानम् ।
लवमपि तव कलयामि रमाधव कृतयुगकोटिसमानम् ॥ ५ ॥

पतिसुतबान्धवजनमपहाय वने तव सविधमुपेतम् ।
युवतोजनं विजने विपिने नहि हातुं समुचितमेतत् ॥ ६ ॥

रजनिमुखे तव मुखसरसीरूहमलिललितालक[2]शोभम् ।
गोधनबेणुरुचिररुचि नो हृदि वलयति चुम्बनलोभम् ॥ ७ ॥

इति वनमालिविरहदहनाकुलकुलयुवतीकलगीतम् ।
यामुनवनमनुसरसं रसयतु रसिकहृदयमुपनीतम् ॥ ८ ॥

अजनि रजनिरेषा नूनमर्द्धावशेषा
वनमपि घनमेवं गोपबालाश्च लोलाः ।
अथ कथमुपयामः कुत्र वा कोटिकाम-[3]
प्रतिमतनुमनून प्रेमकन्दं मुकुन्दम् ॥ १८ ॥

इति विरहवतीनां गोपलीलावतीनां
हरिगुणगणगानं कुर्वतीनां वनान्ते ।
जलदपटलकान्ते राधिकैकान्तकान्ते
चिरनिरतमतीनां मन्युतोऽभूद्विरागः ॥ १९ ॥

ब्रजयुवतीजनगीतं श्रुतिमुपनीतं विदूरेऽपि ।
अतनुत हरिपरितोषं परिहृतदोषं तदीयगुणपोषम् ॥ २० ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
रासोत्सववर्णने विरहिवरवर्णिनीको नाम पञ्चमः सर्गः ।

●

---

1. ग. विलोकन ।
2 ख. मलिलुलितालक ।
3. क.ख. कोटि वा कुत्रकाम ।

षष्ठः सर्गः

कृष्णस्तु तृष्णाकुलमानसां तां
राधामुपादाय वनान्तराले ।
अन्तर्दधानोऽतिमनोरमेषु
निकुञ्जपुञ्जेषु चकार लीलाम् ॥ १ ॥

अनून जन्मान्तरपुण्यसञ्चयै-
र्नूनमुपनीत दयितं नितम्बिनी ।
मनीषयाशक्यमयोगपक्वया
न गोचरीकर्त्तुमरीरमद्धरिम् ॥ २ ॥

मूर्ति कांचन काञ्चन[1]प्रतिनिधिं लावण्यवारांनिधिं
तन्वङ्गीं दधती रतिप्रतिजयत्केलिकलाकौशला ।
एकान्ते शरदिन्दुसुन्दरमुखी कान्तेन कान्तेन सा
राधाराधनया परं सविनया रेमे रमेव स्वयम् ॥ ३ ॥

तत्रैकान्तं भुवनभवनध्वान्तमुत्सादयन्तं
ज्योत्स्नासारैर्जगति सितिमाद्वैतमापादयन्तम् ।
कन्दर्पस्य प्रणयसुहृदं पार्वणं शर्वरीशं
पश्यन्मन्दस्मितसखमुखं माधवः प्राह राधाम् ॥ ४ ॥

पञ्चत्रिंशः प्रबन्धः

ललितरागेण गीयते

कलयति गुणवति सकलकलङ्कितशारदशितकरविम्बम् ।
मृगमदमकरमनोहरतर भवदानननलिनविडम्बम् ।
सुन्दरि खेलय चलसुभगम् । गगनाङ्गणमनुनयनमृगम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. काचन ।
   ख. अत्रैकान्तं ।

श्यामलचामरसुषमसमुल्लसदसितकलङ्कनिवेशम् ।
मनसिजराजरजतफलकायितमवकलयामि निशेशम् ॥ २ ॥

उडुगणपाण्डुरपुण्डरीकघनगगनसरोवरहंसम् ।
लोकय लोकनयनसुखदायकमपि युवकोकनृशंसम् ॥ ३ ॥

मलिनमखण्डसुधाकर[1] लाञ्छनमपि हरिमप्रतिमानम् ।
अनुशीलयति कलयवलयायितपन्नगशयनशयानम् ॥ ४ ॥

सहजगुणाभिभवेन धरणिमतिधवलितवति विधुविम्बे ।
सौरभरभसवशेन कोकनदकुमुद[2] भिदामवलम्बे ॥ ५ ॥

हीरकचूर्णनिचयरचितं शितिमिव रुचिरस्मरसाणम्[3] ।
शशिनमिमं किमवैषि न ते जितविषमकुसुममयबाणम् ॥ ६ ॥

धृतपरभागरागलतिका रतिविभ्रममुकुरसलीलम्[4] ।
शशिमुखि चन्द्रमवेहि सुधारसशीकरविसरणशीलम् ॥ ७ ॥

इति वनमालिललितवचनामृतमाननचन्द्रनिरीतम् ।
रसयत रसिकजना यदनारतरतिराधामनुगीतम्[5] ॥ ८ ॥

गलित कतिपयदुरश्चिदिन्दुप्रकर
इतो निशि शाखिमूलदेशे ।
कलयति ललितेन्द्रनीलभूमितल-
विलसत्कुसुमोपहारशोभाम् ॥ ५ ।

कलावति कलावति प्रियतमे मनोजन्मनो
भृशं प्रणयिनीं दृशं मयि निधेहि राधे विधौ ।
विधौ तदनुमोदिनि[6] प्रकृतितोऽधुना नोचितं
हितं प्रतिसमीहितं किमपि वक्तुमस्मादृशैः ॥ ६ ॥

---

1. क मलिनसुधाकर ।
   ख. मञ्जुलसुधाकर ।
2. ग. मुकुन्द ।
3. ख. शाणम् ।
4. ख. सलिलम् ।
5. ख. मनुगतम् ।
6. ग. तदनुमेदिनी ।

कलावतीति सम्बोध्य कृष्णेन यदुदीरितम् ।
अन्यस्या नाम मन्वाना तन्वी तेनात्यतप्यत[1] ॥ ७ ॥

अथ सा सपदि विवर्णा रोषविदीर्णान्तरा राधा ।
वसुधां नखैर्लिखन्ती शुचमुपयन्ती दधे मानम् ॥ ८ ॥

अपदे मानं दधतीं पदमभिदधतीं न चैकमपि ।
निशि घनवृन्दवृन्दारण्ये तामनुनिन्ये मुराराति: ॥ ९ ॥

षड्विंश: प्रबन्ध:

दक्षिणकामोदीरागेण गीयते

किमधिधरणि रमणिमणि रचयसि लोचननलिनविलासम् ।
विस्मरति स्म किमिति भवती दरकुन्दमधुरमृदुहासम् ॥
राधे मानिनि परिहर मानम् ।
मानय कृतमनुरागभरं मयि मानय बहुलघिमानम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

किमिदमुपैति वदनमचिरोदितशितकरबिम्बविडम्बम् ।
विजितविधुन्तुदलोलकपोलविलम्बिचिकुरनिकुरम्बम्[2] ॥ २ ॥

अयि किमकारणकोपभरे नखरेण लिखसि भुवि लेखाम् ।
मृदिततनुं सुतनो कलयामि दिवेव निशाकरलेखाम् ॥ ३ ॥

रचय वचनामृतं चिरमृतमपि जीवय कुसुमशरासम् ।
दासजने मयि कृपय कृपामयि सुन्दरि न कुरु निराशम्[3] ॥ ४ ॥

इति वृषभानुसुतानुनयाकुलवनमालीरितगीतम् ।
रसयतु रसिकजनोऽतिमनोरममममृतमिव श्रुतिपीतम् ॥ ५ ॥

---

1 ख. तेनाप्यतप्यत ।
2. ग. निकुरुम्बम् ।
3 क. निरासं ।

रागी सन्नपि तन्वि तेऽयमधरः पीयूषवर्षी मम
स्निग्धेयं कुटिलोऽपि कुन्तलभरो धत्ते मदीयां रुचिम् ।
कामं ते नयनं तथापि सततं चेतोऽनुकूलं[1] हि मे
त्वं केनापि नयेन भाविनि मयि प्रीता कृता मध्यमा ॥ १० ॥

तूष्णिकं कुरु कुञ्जकोकिलकुलं ह्रीणातु वीणारवो
मुग्धे सङ्गशुकं च पञ्जरशुकं राधे विदेहिक्षणात् ।
द्राक्षामिक्षुरसं च वञ्चितवता[2] क्षीरे रुचिं तन्वता ।
बाले वागमृतेन कारय चिरात्कर्ण्णद्वयी पारणाम् ॥ ११ ॥

उपरि तु परितापं प्राप्स्यसि प्राणकल्पे
कुरु मयि रुषमल्पे नापराधे पराधे ।
यदिह शिशुकुरङ्गी प्रेक्षणे नेक्षणं ते
कलितललितलीलं[3] तुल्यमित्यभ्यधायि ॥ १२ ॥

अनुनीतवतोऽप्येवं मानग्रहगृहीतया ।
अवधारितमेवासीदीरितं[4] राधया हरेः ॥ १३ ॥

मानमशक्यापनयं ध्रुवमिदमियं वनोपेक्षाम् ।[5]
हरिरपि निर्णीय तदा वभूव कुञ्जान्तरान्तरितः ॥ १४ ॥

अथ सा रसान्तर निरन्तराशया
दयिताशया तत इतो विचिन्वती ।
अतिभीति[6] चञ्चलदृगञ्चलाञ्चिता
विषमामवाप परितापसम्पदम् ॥ १५ ॥

---

1. ख.ग. चेतोऽनुकूलं ।
2. ख. वञ्चितवती ।
3. क कलितलीतलीलं ।
4. ख. अवधारिततमेवासीदिरितं ।
5 क ख. ध्रुवमिदमाविनोपेक्षां ।
6. ख. इतिभीत ।

सप्तविंशः प्रबन्धः

मल्लाररागेण[1] गीयते

किं मया कृतमकृतमतिकरणीयमेवम् ।
हरिहरि चिरमनादृतनन्दनन्दनपादसेवम् ॥
॥ ध्रुवपदमिदम् ॥

किमिति वत परिरम्भसुखमुपलम्भनीयम् ।
हरिहरि सम्भ्रमेण सुधावधोरितमेतदीयम् ॥
तदधरामृतमाधुरीहृतमानसाहम् ।
हरिहरि तदपि मम विदधाति विधुरतिदेहदाहम् ॥ १ ॥

निन्दितं मम जनु[2]रनुत्तममन्दहासम् ।
हरिहरि तारतरगजमौक्तिकोत्तमचारुनासम् ॥
यदहमिह विहरन्तमन्तिक उचितवेशम् ।
हरिहरि मधुपतिं[3] प्रति कृतवती नहि मानलेशम् ॥ २ ॥

यदि कथञ्चिदुपैमि पुनरपि नागरं तम् ।
हरिहरि रहसि लोचनगोचरे मम संचरन्तम् ।
प्रेमहेमनिधानमतिबहुमानयेयम् ।
हरिहरि परिचरणेन भृश वशमानयेयम् ॥ ३ ॥

उरसि[4] विलुलितचटुलनिस्तुलतारहारम् ।
हरिहरि कञ्जगञ्जननयनमसृणमसारतारम् ।
कुसुमवृन्दमयूरचन्द्रकचारुचूड़म् ।
हरिहरि लोकये बनमालिनं क्व नु कुञ्जगूढम्[5] ॥ ४ ॥

---

1. ख महारराागेण ।
2. ख. निन्दितममजहु ।
3. ख. मधुपति ।
4. ख. भरसि ।
5. ग. चतुर्थपदस्योल्लेखो नास्ति ।

इति चिन्ताजड़नयना[1] तनुरनुतापेन शून्यहृदया सा ।
विदधे निष्पन्दाङ्गी[2] मञ्जुलतनुशालभञ्जिकालीलाम् ॥ १६ ॥

हरिरपि[3] राधामानं प्रणयनिदानं निरुपयन्नन्तः ।
चिन्तयति स्म वनान्ते तत्कोपाकारमाधुरीमधिकाम् ॥ १७ ॥

अष्टाविंशः प्रबन्धः

नादरामकिरीरागेण[4] गीयते

किमिति चकार सपदि मुखमुन्मुखमपि कुपितारुणगण्डम् ।
बालारुणकरनिकरकरम्बितमिव कनकाम्बुजषण्ढम् ॥
सा सरसा लसदङ्गम् । कामयमाना मम तनुसङ्गम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

गणयन्नपि बहु हृदि न कथंचन कलये[5] माननिदानम् ।
अथ दयिते मयि वीतरसा कथमिदमाचरदसमानम् ॥ २ ॥

किमु सुमुखी विमुखीति चिरं मयि विदधे निरवधिमानम् ।
यदिदं वदनमकारि कलङ्कितसितकिरणेन समानम् ॥ ३ ॥

इति वनमालिनि भालितविरहितगोकुलयुवतिचरित्रम् ।
सुखयतु विषयविषाकुलजनमपि सुरनरलोकपवित्रम् ॥ ४ ॥

सैषा रोषकषायितेक्षणमिषाद्बाणं[6] विषालोड़ितं
तन्वङ्गी प्रजहार मारनृपतेराज्ञाकरी यन्मयी ।
सम्मोहादधुना क्व वा भवतु मे तद्वेदनावेदना
तत्तस्या मधुराधरामृतमृते नूनं न मे जीवनम् ॥ १८ ॥

---

1. ख. चिन्तांजतनयना ।
2. ख. निस्यन्दाङ्गी ।
3. ग. हरिर्हरि ।
4. ख. रामकीरीरागेण ।
5. ख. कथंचन न कलये ।
6. ख. क्षणविपाद्बाणं ।

इति राधां दुराराधां निर्णयन्नन्दनन्दनः ।
निषसाद विषादेन[1] विवर्णनलिनाननः[2] ॥ १९ ॥

एकान्तं हरिरथ चिन्तयन्नुपायं
सन्तोषं प्रति वृषभानुकन्यकायाः ।
सस्मार स्मरशरजर्जरान्तरात्मा
सर्वात्मा सपदि तदीयनर्मदूतीम् ॥ २० ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
दुःसाधराधो नाम षष्ठः सर्गः ।

---

1. ख. न्यश्वसद्विपादेन । 2. ख. विवर्णानन्दिनाननः ।

सप्तमः सर्गः

अन्तर्दधे रासविलासभूमे राधामुपादाय यदैव कृष्णः ।
तदाप्रभृत्युन्मदचित्तवृत्तिवृन्दा न वृन्दावनसौख्यमाप ॥ १ ॥

विचिन्वतीनामथ यूथशो हरिं व्रजाङ्गनानां व्रजतो विनिर्गता ।
सखी वियोगव्यथमानमानसा वने वने सानुससार राधिकाम् ॥ २ ॥

अयि मयि धातर्भ्रातः किं तव कितवातिनिर्दयं हृदयम ।
यदहं कृता वराकी वत[1] हरता कृष्णसन्निधिं विधुरा ॥ ३ ॥

सैवं दैवं विनिन्दन्ती कुन्ददन्ती घने वने ।
विचिन्वन्ती हरिं दूती प्राप तापसखीं सखीम् ॥ ४ ॥

निरीक्ष्य वीक्षा भवतीमतीव सा
प्रसारिता शोकभरेण दुर्दिनम् ।
दधार राधा मनुहैमनक्षपा
प्रभातवाताकुलितेव वल्लरी ॥ ५ ॥

अथ मन्मथोन्मथितचारुविभ्रमां
प्रवलभ्रमां प्रकृतितो मनोरमाम् ।
परमां रमारमणहेलनाकृतां
हृदि विभ्रतीं शुचमुवाच सा सखीम् ॥ ६ ॥

ऊनत्रिंशः प्रबन्धः

सारङ्गरागेण गीयते

दिशि दिशि दिशसि सजलनयनान्तम् ।
हिमकणकलितकमलदलकान्तम् ॥
किमिति घने केलिवने । सखि रहिता हरिणा विजनवने ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. तव ।

विस्मृतमधुरतरस्मितलेशा ।
ध्रुवमवधीरितसुहृदुपदेशा ॥ २ ॥

निःसहनिपतिततनुतनुवल्ली ।
चिरपरिहृतरतिविभ्रमवल्ली[1] ॥ ३ ॥

खण्डफलकतलविलुलितकेशा ।
प्रमुदित-मृगमद-पत्रकवेशा ॥ ४ ॥

श्वसितसमीरण-धूसरमधरम् ।
बहसि वदनविधुमपि बहुविधुरम् ॥ ५ ॥

कथमवमानमकृत तव यदयम्[2]
हरिरिति विस्मयते मम हृदयम् ॥ ६ ॥

कथय कथं तव काञ्चनभङ्गम् ।
इदमधुना हृतसौभगमङ्गम् ॥ ७ ॥

लुठसि धरणीमनुतरणिविचिन्ता[3] ।
अपि वनमालिन[4]मनुगतचित्ता ॥ ८ ॥

इति सखीमनुयोगवतीमपि
प्रियवियोगजदुःखभरान्तरा ।
किमपि सा प्रतिवक्तुमनीश्वरा
तदनु नीरमधीरदृशासृजत् ॥ ७ ॥

साथ नाथ[5]वितथव्यतिक्रमं
संक्रमं कथयति स्म विस्मिता ।
बोधिता पुनरसौ तथा यथा
निर्णनाय[6] निखिलं तदन्यथा ॥ ८ ॥

---

1. ग. चिल्ली ।
2. क ख. कथमवमानमकृततवयदयं ।
3. ग. मनुतरुणिविचिन्ता ।
4. ख. अपि गतमालिन ।
5. ग. साथनाथ ।
6. क.ख. यथान्तर्निनाय ।

राधा मुधापराधान्माधवमनुविभ्रती परितापम् ।
तत्सङ्गमं दुरापं प्रार्थयमाना सखीमुचे ॥ ९ ॥

विंशः प्रबन्धः

कामोदीरागेण गीयते

सखि हे नन्दय नन्दकुमारम् ।
रहसि[1] मयाविनयादवधारितमुपचितमदनविकारम् ॥
॥ ध्रुवपदमिदम् ॥

असमयरोषकषायितया[2] पदपल्लवलम्बितहस्तम् ।
कोकनदारुणलोचनया बहुदुर्वहविरहविहस्तम् ॥ १ ॥

नियमितवचनरचनकलया गुरुचाटुकथनपटिमानम् ।
नमितवदनविधुमण्डलया परिशीलितविनयविधानम् ॥ २ ॥

विलुलदसंयतकैशिकया परिकर्मविलाससलोभम् ।
नखरलिखितधरणितलया परितापमृदिततनुशोभम् ॥ ३ ॥

शोकसलिलभरजर्जरयापराधिनमपि[3] भयवन्तम् ।
अभिमतविषयनिरादरया वनमालिनमनुसृतवन्तम् ॥ ४ ॥

इति सा सविनयमुदिता विचिन्वती[4] केलिकानने मुदिता ।
समधिकविरहविषादं तमलोकत नन्ददायादम् ॥ १० ॥

वृषभानुनन्दनिकया कथितं सकलं कलङ्करहितेन्दुमुखी[5] ।
सरसं सखी मधुपतिप्रणयप्रसरदं वचनमाह रहः ॥ ११ ॥

निपीय पीयुषरसोपमं क्षमं मनोविनोदाय तदा तदीरितम् ।
हरिः परीप्सन्नदसीयसङ्गमं दिदेश राधानयनाय दूतिकाम् ॥ १२ ॥

---

1 क.ख. रसि ।
2. ख. कषायिततया ।
3. ग. धिनमप ।
4. क. विचिन्वन्ती ।
5. ख. रहितेन्दुमुखीम ।

अथ नन्दनन्दननिदेशनुत्तया द्रुत-
मन्तिकं प्रतिनिवृत्तया[1] ततः ।
तरसाभिसारयितुकामया तया
वृषभानुजा निजगदे मनोरथम् ॥ १३ ॥

एकविंशः प्रबन्धः

शङ्कराभरणरागेण गीयते

द्रुतमभिसर सखि कुञ्जकुटीरम् । वपुषि विलेपय सरसपटीरम् ।
राधिके ब्रजतरुणीषु गुणाधिके ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मुरलीरवमवधारय धीरम् । पश्य रहसि सहचरि यदुवीरम् ॥ २ ॥
लोकय नभसि सकलकलमिन्दुम् । प्रसृमरमधुरसुधारसविन्दुम् ॥ ३ ॥
मल्लीकुसुमकरम्बितकेशा । विशद[2]वसनधृतसमुचितवेशा ॥ ४ ॥
मूकय सहजमुखरमञ्जीरम् । केलिसदन इव पञ्जरकीरम्[3] ॥ ५ ॥
कुसुमसमूहरचितरतितल्पे । रमय मदनमिव[4] केलतितल्पे[5] ॥ ६ ॥
किमपरिशीलितसुहृदपराधे । अयि कृपयसि न कृपामयि राधे ॥ ७ ॥
माधवमनुसरकेसरकान्ते । मानय वनमालिनमेकान्ते ॥ ८ ॥

इति प्रियोपनीतमात्मनीनमुन्मनीकृतं
निशम्य सम्यगादृतं सखीमुखेन भाषितम् ।
मसार[6]सारलोचना मनागपि स्फुटं न किं-
चिदाह सा हसन्त्युदारभावलालसं परम्[7] ॥ १४ ॥

---

1. ख. प्रतिनिवृत्ततया ।
2. क. विषद ।
3. ख. कुञ्जरकीरम् ।
   ग. पञ्जरकारम् ।
4. क.ख. वदनमिव ।
5. ख. कल्पे ।
6. ख. संसार ।
7. क.ग. परमित्यस्य लेखो नास्ति ।

कवरविलसन्मल्लीवल्लीघन[1] स्तनमण्डली
परिसरचरन्मुक्ताहारा पटीरविलेपना ।
अकृतललना मन्दान्दोलन्मदालसलोचना
विशदवसना वीताङ्गी साभिसारमहोत्सवम् ॥ १५ ॥

द्वात्रिंशः प्रबन्धः

मुखावरीरागेण गीयते

प्रणयवती ब्रजरामा । रमणं रमयितुकामा ।
अनुदिनमभिमतसङ्गमसुखमिममभिसरति स्म सकामा[2] ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

नन्दतनयनिजकान्ता । पीनपयोधरतान्ता ।
पृथुलनितम्बवती गतिमन्थरभावचकित[3] नयनान्ता ॥ २ ॥

परिमितविशद[4] विभूषा । परिहृतयौवत[5] दोषा ।
नन्दतनुजमन्दरमधुर[6] स्मितभावनगुरुपरितोषा[7] ॥ ३ ॥

मन्दरधरसविलासा । कुन्दरुचिरदरहासा ।
रदनरुचि[8] द्विगुणद्युतिमण्डलतारतरलमणिनासा[9] ॥ ४ ॥

स्तनतटमण्डितहारा । घनचन्दनघनसारा ।
नारायणरतिवसतिरुदारा गुणगणबन्धनकारा ॥ ५ ॥

वनमालिनमनुवृत्ता । विषमविषमशरनुत्ता ।
मोहनवदनसुधानिधिविगलितगीतसुधासवमत्ता ॥ ६ ॥

---

1. ख. विलसद्झिल्लिघन ।
2. क.ख. सकामं ।
3. ख. ललित ।
4. क.ग. विषद ।
5. ख. यौवन ।
6. ख. मन्दमधर ।
7. ख. गुरुपरिवेषा ।
8. ख. रदनुरुचा ।
9. ख. नाशा ।

श्यामतामरसचारुलोचनं
सारमारसुषमावमानिनम्[1] ।
सारमारतिनिवासमासद-
न्नन्दनन्दनमनङ्गरङ्गिणी ॥ १६ ॥

अमन्दसुन्दरस्मितं दराल[2]सायतेक्षितं
निरुद्धदर्प[3]दर्पकस्मयक्षयाय[4] दीक्षितम् ।
अरीरमत्परीतनागरीगणं विहाय तं
समागतं स्वमाननाय नायकं व्रजाङ्गना ॥ १७ ॥

वदनपद्मगुणोत्करसन्दितो[5] निजविपक्षतयेव[6] निशापतिः ।
अनुससार हरिं चिरनिश्चलो न विचचाल निशापि पतिव्रता ॥१८॥

सुखं कुञ्जे कुञ्जे पिककलघने केलिविपिने
चिरं कारं कारं निरुपमविहारं भगवता ।
रतान्ते सैकान्ते प्रणयभरसंभिन्नहृदया
निरावाधा राधा वचनमिदमूचे मुरहरम् ॥ १९ ॥

त्रयस्त्रिंशः प्रबन्धः

भैरवीरागेण गीयते

कनककलशलसदुरसिजभारम् । विरचय कलिततरलतरहारम् ।
माधव चिरमुदितम् । कुरु मयि भूषणसमुदयमुदितम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ग. मानितं ।
2. ख. दखिल ।
3. ख. रुचदर्प ।
4. ख. क्षमाय ।
5. ख. सहितो ।
6. ख. विपक्षयेव ।

गण्डफलकमनुमण्डनलेशम् । कुरु मृगमदरसपत्रनिवेशम् ॥ २ ॥
भूषय भालममलशकलेन्दुम् । नन्दतनुज तनुचन्दनविन्दुम् ॥ ३ ॥
प्रमुदमुदञ्चय कुञ्चितकेशम् । रचय कुसुमचयचर्च्चितवेशम् ॥ ४ ॥
शितकरविम्बमिलितशिततारम् । नसि विनिवेशय शितमणिसारम् ॥ ५ ॥
घटय जघनमनुसिञ्जिततारम् । रसनाभरणमुदित[1]मुदारम् ॥ ६ ॥
पूरय नूपुरयुगमधिचरणम् । विलसदलक्तकरागाभरणम् ॥ ७ ॥
इति वनमालिनमनोहरवचनम् । रसयत गोपयुवतिकृतरचनम् ॥ ८ ॥

समदमदनावेशादेषा[2] यदाह तदा मिथो
मुररिपुरथो रागावेगात्तदाचरदत्वरम् ।
हरिकरपरिरम्भारम्भादसावपि लम्भिता
तनुरुहसमुल्लासं हासं[3] सपद्यनुपद्मिनी ॥ २० ॥

इति वृषभानुतनुजारतान्तपूजाविधाविशेषज्ञः ।
कर्म समाप्तौ तस्याः प्रसादमासादयन्[4] हरिर्मुमुदे ॥ २१ ॥

उपलभ्य भूरिपरिदेवनं वने
प्रणतार्त्तिनाशनधुरन्धरो हरिः ।
व्रजसुन्दरीसमुदये दयोदया-
दथरासमण्डलममण्डयत्पुनः[5] ॥ २२ ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
रासोत्सववर्णने प्रमुदितमाधवो नाम सप्तमः सर्गः ।

---

1. क. मुदीत ।
2. ख. द्वेषा ।
3. ख. हसं ।
4. ख. मापादयन ।
5. ख. रासममण्डयत्पुनः ।

अष्टम सर्गः

पश्यन्तीनामथ दिशि दिशि प्रेयसीनां मुरारेः
पन्थानं तत्प्रणयलहरीसङ्गलोलोत्तरङ्गः[1] ।
अन्तः सन्तोषण[2]मुपनयन्नाविरासीदसीम-
श्रीमान् रासोत्सवभुवि समं राधया बेणुपाणिः[3] ॥ १ ॥

विस्मेरस्मेरनेत्राम्बुजतलविचलद्[4]भृङ्गसंभ्रान्ततारा-
स्ता रामास्तत्र रामानुजवदनविधुं लोचनान्त्यैः पिवन्त्यः ।
चिन्तासन्तापमन्तः समुपचितचरं तत्क्षणं क्षीणयन्त्यः
प्रत्युत्थानासनाभ्यामपचितिमुचितामादधुर्माधवस्य ॥ २ ॥

आसा[5]मासादयन्तीनां दुर्लभं प्राणवल्लभम् ।
अभूदभूतपूर्वेव वदनाम्भोरुहप्रभा ॥ ३ ॥

चतुस्त्रिंशः प्रबन्धः

मालवरागेण गीयते

काचन करसरसीरुहमकलयदञ्जलिना मधुपतिनिहितम् ।
काचिदुचितघनचन्दनलेपनमधितरमाधववपुषि हितम् ॥
रासे वरहसिता[6] । रमणमरमत वरवनिता ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. सङ्गलोलात्तरङ्ग ।
   ग. सङ्गलोलान्तरालः ।
2. क. पन्तोषण ।
   ख. सन्तर्पण ।
   ग सन्तोष ।
3. ख. वेशुपाणिः ।
4. ग. विगलद् ।
5. क. तासा ।
   ग हासा ।
6. ग. दरहसिता ।

स्मरशर[1] तापभरादपराकृतमाधवचारुचरणकमलम् ।
मलयजपङ्करङ्कुमदचर्च्चितकुचकलशोपरि मृदुलतलम् ॥ २ ॥

एकाकुरुत काकुरुतमभिनवमदनमनोरममभिदयितम् ।
अन्या मधुरममन्यत तदधरमधुरसमसकृदमृतमहितम्[2] ॥ ३ ॥

कापि कपोलफलकमनुचुम्बितुमुपलम्बितवदना निभृतम् ।
प्रणयवती निजगाद निजं किमु तापमसमशरबाणकृतम् ॥ ४ ॥

मनसि परा हरितनुपरिरम्भणमलसनिमीलितचलनयना ।
पुलकाकुलितललिततनुरतनुत वनमालिनि समुदितमदना[3] ॥ ५ ॥

विप्रलम्भमपि लम्भिता हि ताः
प्रेमकन्दलयितुं ततो हरिः ।
नागरी[4]प्रणयमाधुरी परि-
पाकमाकलितवा[5]नरीरमत् ॥ ४ ॥

साकूतहासपरिहासवचोऽभिलाष-
सप्रेमहेमकुचकुम्भनखाङ्कपातैः ।
संरम्भगाढपरिरम्भणचुम्बदन्त-
घातैरते रतिपतिप्रतिमः स रेमे ॥ ५ ॥

प्रीतास्तुम्बुरुनारदप्रभृतयो गन्धर्वविद्याधराः ।
सिद्धाश्चाप्सरसो रसोत्कमनसो भास्वद्विमानासनाः ।
लेखाः शम्भुसरोजनन्दनमुखास्तत्रागमन्नुन्मुखाः
द्रष्टुं रासरसं हरेः सरभसं व्योमान्तसर्वंकषाः ॥ ६ ॥

---

1. ग. स्मरगर ।
2. ख. मसकृतमृतमहितम् ।
   ग. मसकृतदमृतमहितं ।
3. ग. समुदितमना ।
4. क. नागरीः ।
5. ख. पाकमाललित ।
6. ग. सर्वंकपः ।

विलसति रतिरासे गोपलीलाविलासे
भगवति दिवि नेदुर्दुन्दुभीनां समूहाः ।
मुदिततरसुरेशैर्व्योमगङ्गाम्बुलेशैः
सरसकुसुमवृष्टिर्दृष्टिकान्ता वितेने ॥ ७ ॥

हृदयमदनशीलां श्रीपते रासलीलां
सुरवरवनिताभिः पत्युरङ्कस्थिताभिः ।
सरभसमवलोक्य प्रेमपूर्णान्तराभिः
सरसवचनमूचेऽन्योऽन्यमामोदिताभिः[1] ॥ ८ ॥

पञ्चत्रिंशः प्रबन्धः

केदाररागेण गीयते[2]

सखि हे लोकय नन्दकिशोरम्[3] ।
राधावदनसुधाकरशीकरसादरनयनचकोरम् ।
॥ ध्रुवपदमिदम् ॥

काचन मधुरिपुवपुषि विलेपनमतनुतसौरभसारम् ।
चुम्बति कापि नितम्बवती रतिविभ्रमतरलिततारम् ॥ १ ॥

कापि रुचिरहरिचन्दनचर्च्चितहरिभुजमगुरुसुगन्धम् ।
शिरसि रसिकवरहृतहृदया[4]दितरतिरसरभसनिबन्धम्[5] ॥ २ ॥

कापि मधुरमधरामृममलभत हरिमुखचन्द्रनिरीतम्[6] ।
विधुवदना मदनानल[7]विह्वलमसकृदकृतपरिपीतम् ॥ ३ ॥

---

1. ख. मामोदिनीभिः ।
   ग. मासोविताभिः ।
2. क.ख. रागस्योल्लेखो नास्ति ।
3. ग. लोलयनन्दकुमारं ।
4. क.ख. वरहृतहृतवरयादि ।
5. ख. निवन्धा ।
6. क.ख. निरुतं ।
7. ख. महनानन्द ।

नागवल्लीदलविरचनकौशलमनुहरि कापि कृशाङ्गी ।
कलयति केलिकलाकुशला घनकण्टकदन्तुरिताङ्गी ॥ ४ ॥

नृत्यति हसति मधुरमनुगायति रणयति बेणुमुदारम् ।
कामपि रमयति रहसि हरिरतिरासससभाजितमारम्[1] ॥ ५ ॥

काचन हरिपरिरम्भसुखेन निमीलितनयनसरोजा ।
वेद न भेदलेशमिदमहमिति निर्भरमुदितमनोजा ॥ ६ ॥

मुररिपुरधितविलासवतीकुलवलयिततनुरनुरागम् ।
कांचन[2]काञ्चनमणिगणमध्यगवलभिदुपलपरभागम् ॥ ७ ॥

मदननिगमसमयानुगतं कृतमुपचित[3]रासविलासम् ।
रसयतु रसिकजनो वनमालिन उदितमनोजविकासम् ॥ ८ ॥

अथ रासमण्डलविलाससम्पदं
मुरवैरिणः[4] प्रतिपदं रसावहाम्[5] ।
समवेक्ष्य गायनगुणाग्रणीर्गुणा-
नुदगायदम्बरविलम्बतुम्बुरुः ॥ ९ ॥

षट्त्रिंशः प्रबन्धः

दक्षिणकामोदीरागेण गीयते

करुणारसभरपात्रम् । तरुणाम्बुदरुचिगात्रम् ।
वरुणालयतनयारमणं दलदरुणा[6]म्बुजदलनेत्रम् ।
॥ ध्रुवपदमिदम् ॥ १ ॥

सुन्दरतरदरहासम् । कुन्दरदनसविलासम् ।
मन्दरधरणोचितमणिताचलकन्दरकलितनिवासम् ॥ २ ॥

---

1. ख. रतिरासससराजितमारम् ।
2. क ग. कंचन ।
3. ग. कृतमुपचित ।
4. ग. सुरवैरिणः ।
5. ग. रसावहं ।
6. ख दलद्दरुणा ।

शमितपुरन्दरमानम् । दमितभुजगगुरुमानम् ।
नमितसुरासुरमौलिमुकुटमणिममित[1]गुणैकनिधानम् ॥ ३ ॥

चरणानतमुनिवृन्दम् । शरणागतसुखकन्दम् ।
तरुणाकुलजन भवसागरदरहरणा[2]यामलमन्दम् ॥ ४ ॥

शमलापनयनरङ्गम् । कमलारसलसदङ्गम् ।
अमलाननवनमालिनमनुसर यमलार्जुनतरुभङ्गम् ॥ ५ ॥

श्रीनारदो ललितगानविशारदोऽथ
तत्प्रेमसंमदवशम्बदचित्तवृत्तिः ।
तेनाविनाकृतमपस्वरपाटबन्धं
सूड़प्रबन्धमुपवीणयति[3] स्म तत्र ॥ १० ॥

नन्दसुनुवृषभानुनन्दिनीवन्दनीयचरणारविन्दयोः ।
विन्दतान्मम मनो मिलिन्दतां मन्दतां समुपयातुसंस्कृतिः ॥ ११ ॥

इति राधामाधवयोः विधाय पदवन्दनम् ।
सूड़प्रबन्धमारेभे चतुराननसूनुना ॥ १२ ॥

सप्तविंशः प्रबन्धः

नटरागेण[4] गीयते

॥ आदितालेन ॥

जय जय यदुनन्दन नन्दनयनसुखकन्द-
नलिनभवकलितनते ।
सुरनरनन्दनन्दनपतिकृतवन्दन[5]
निजजनपरमगते ॥ १ ॥

---

1. ख. मणिममिता ।
2. क.ख. सागरहरणा ।
3. ग. मुपविषयति ।
4. क. नाटरागेण ।
5. क. बन्धन ।

दलितप्रदञ्जनगञ्जन सुषमनिरञ्जन-
जनहितविहितरते ।
जगदनुरञ्जनखञ्जन विकसितकञ्ज-
नयन सुरनिकरपते ॥ २ ॥

॥ यतितालेन ॥

चरणपङ्कजशरणसज्जनवृजिनतिमिरविभाकरम् ।
निखिलकारणकारणं गजतारणं[1]करुणाकरम् ॥ १ ॥
भजत[2]वल्लवनागरं धृतभुवनपालनजागरम ।
योगिमानसराजहंसमुदाररासरसादरम् ॥ २ ॥
नटनपटुतरवेशपेशलममलकुण्डलमण्डितम् ।
स्मरशराकुलसकलगोकुलनागरीरतिपण्डितम् ॥ ३ ॥

॥ निःसारितालेन ॥

जयजय यदुवंशवतंसक हंसकरुचिचरण[3]हरे ।
कमलाधव मुरहर माधव पातककरिकलन हरे । १ ॥
मुरलीकलकवलितगोकुल युवतीकुलसहजधृते ।
रागरसिकमानसरञ्जक तानगान[4]रीतिरते ॥ २ ॥
तरुणीमणिमणिरसनागुणकिङ्किणिगणकणकणसिञ्जिते[5] ।
रञ्जितरतिरासमहोत्सवघृतनवनवनाल्यगते ॥ ३ ॥

॥ मण्ठतालेन ॥

सघनसार गन्धसारसौरभरभसागतम् ।
भ्रमरवृन्दमनुमरन्दमुदितनिरन्तरागतम्[6] ॥ १ ॥
चलितसारसमपसारयन्तमन्तिके भृशम् ।
नमत सारममलहारलसदुदारवक्षसम् ॥ २ ॥

---

1. क. जगतारणं ।
2. ग. भुज ।
3. क. वतंसककृतचरण ।
4. क. रञ्जकगान ।
5. क ग. सिञ्जित ।
6. क निरनुरागतं ।

॥ झम्पकतालेन[1] ॥

व्रजनगरकामिनी निविड़सौदामिनी
घटितघनकान्तमतिपञ्चबाणम् ।
अतनुधनुरनु- करणचिल्लीनख-
सहितगोरोचनातिलकबाणम् ॥ १ ॥
पश्य हरिमतुललीलम् ।
कपटकृतपशुपनृपबालशीलम्[2] ॥
॥ ध्रुवपदमिदम् ॥

कमलनन्दन- घटनपटिसीमन-
मुपमानवर्जितमुदितचारुवेशम् ।
पल्लवोपहित- शितकुसुमसुषमा-
धराधरमधुरविम्बमृदुहासलेशम् ॥ २ ॥

॥ त्रिपुटतालेन ॥

दावपावकपानपालितवल्लवीशतवल्लभम् ।
गोपचन्द्रमसान्द्रभावमुनीन्द्रमानसदुर्ल्लभम् ॥ १ ॥
रासमण्डलरचितसमुचितमदनविभ्रमसालसम् ।
नमत हृदि वत नन्दनन्दनमतनुकौतुकलालसम् ॥ २ ॥
कनककङ्कणकिङ्किणीगणरणनमञ्जुलतालकम् ।
मधुरवेणुरवेण सन्दितसहजचलमृगवालकम्[3] ॥ ३ ॥

---

1. ग रूपकतालेन ।
2. ग. चिल्लीत्यारभ्य नृपबाल-शीलमित्यन्तं पाठो नास्ति ।
3. ख. श्रीनारदो ललितेत्यारभ्य चलमृगवालकमित्यन्तं पाठो नास्ति ।

॥ अड्डतालेन[1] ॥

गोवर्द्धनधारक । गोकुलभयहारक ।
यामुनवनखेलन । दनुजव्रजहेलन ।
स्फुटपङ्कजलोचन । जनसंकटमोचन ।
भवसागरतारक ॥ १ ॥

शरणं भव माधव । मामव कमलाधव ।
वल्लवनृपबालक । भुवनत्रयपालक ।
शरणागतरक्षक ॥
करुणाहितलक्षण । तरुणाम्बुजशोभन ।
तरुणीगणलोभन ॥ २ ॥

॥ रूपकतालेन ॥

त्रिभुवनमोहन युवजनसार । गुणगणसागरनयनविसार ॥ १ ॥

॥ उद्ग्राह[2] ॥

मामव सुन्दर नन्दकुमार । अभिनवमदनसुषम[3]सुकुमार ।
रुचिरतनुजितमसृणमसार । लेपितघनचन्दनघनसार ॥
॥ ध्रुवपदमिदम् ॥

मञ्जुलतार तरलमणिहार । वृन्दावनतटविपिनविहार ।

॥ आभोगः ॥

॥ एकतालीतालेन[4] ॥

सकलसुधाकरसोदरदनं[5]गोपयुवतीमदनम् ।
प्रणमतसन्ततमपि मुकुरकदनम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

अगणितगुणगणशोभनसदनम् । वनमालिनमनुमोदितमदनम् ॥ २ ॥

---

1. ख. अन्त्रतालेय ।
2. ख. तदुग्राहः ।
3. ख. सुभग ।
4 ग. लेरितघनचन्मनेत्यारभ्य एकतालीतालेत्यन्तं पाठो नास्ति ।
4. ग. कुन्दमुकुलकुलसुन्दररदनं ।

यस्याङ्के नाभिपङ्केरुहकुहरचरच्चञ्चरीकायमाणो
धाता लोकैकधाता प्रथमलमतनोर्बालभावं प्रपेदे ।
स्वानामिच्छानुरूपां ललिततनुमुरीकृत्य नित्योऽपि सोऽयं
कालिन्दीतीररासे रहति विजयते नन्दगोपालबालः ॥ १३ ॥

परिवादिनीमुदितगीतसन्तते-
रनुवादिनीमिति मुनिर्निनादयन् ।
सममम्ज्जयत्सुरसमाजमानसं
सममेव संमद[1]सुधारसाम्बुधौ[2] ॥ १४ ॥

पादन्यासै रुणुरुणुरणन्मञ्जुमञ्जीरकाञ्ची
सारैस्तारै स्तनतटनटद्भूलहारैविहारैः ।
स्वेदोद्भेदस्तिमितवसनस्पष्टवक्षोजकुम्भैः
रम्भोरूणां रतिमतितरामन्तरापन्मुरारिः ॥ १५ ॥

अथ रासविभ्रमपरिभ्रमश्रमं
शमन्नयं नयननन्दनाकृतिः ।
तरुणः करेणुभिरिवेभयूथप-
स्तरुणीभिराप यमुनाजलं हरिः ॥ १६ ॥

मनोज्ञतीरकानने मनोजविभ्रमक्रमं
निरीक्ष्य मन्मथ व्यथां प्रथीयसामुपेयुषा[3] ।
कलिन्दशैलनन्दिनी तमङ्कमागतं पतिं
समालिलिङ्ग लोलभङ्गबाहुना रसाकुला ॥ १७ ॥

---

1. ख. संमदं ।
 ग. सम्पद ।
2. ख. रसाम्बुधे; ।
3. ग. प्रथीयसीमुपेयुषी ।
3. ख. लोलत्तरङ्गबाहुना ।

जलान्तरुन्मग्ननिमग्नगोपिका
तरङ्गसंघप्रतिविम्बितेन्दुभिः[1] ।
कलिन्दशैलेन्द्रसुता दधे लस-
त्तड़िद्बलाकालिवलाहकप्रभाम् ॥ १८ ॥

सशैवलं कुञ्चितकुन्तलोत्करैः
समुल्लसद्बाहुलतामृणालिकाम् ।
स्फुटं बघूर्ना दधती मुखाम्बुजं
बभौ निशायामपि भानुनन्दिनी ॥ १९ ॥

मुखसरसिजषण्डं मण्डयन् पद्मिनीनां
स्मितमधुमधुरिम्णा पुष्करान्तर्विहारी ।
हरिरजनि रजन्यां विस्मयावेशजन्यां
विदधदधिककान्तः प्रीतिमन्तः सुराणाम् ॥ २० ॥

अम्भःक्षेपैः[2] हरिरथ परिरम्भसम्भावनाभि-
स्तन्वङ्गीनां सरभसपरिहासभावैर्विलासैः ।
भ्राम्यन्तीनां रणितवलयश्रेणीहस्तैर्जलौघं
मध्ये तोयं व्यतनुत मनोनन्दनं सुन्दरीणाम् ॥ २१ ॥

ताम्बूलरागघनसारपटीरपङ्क-
लेपोल्लसत्कुसुमसंचयकेशवेशान् ।
एणिदृशामपनिनाय कलिन्दकन्या-
रोषादिवाशुजलताड़नदोषजातात् ॥ २२ ॥

समनुभूय चिरं शमनानुजा सलिलकेलिकलासुखसम्पदम् ।
उदतरन्नरविन्ददृशो जलाद्विरतनीरविहारकुतूहलाः ॥ २३ ॥

---

1 ग. कलिन्दशैलनन्दिनीत्यारभ्य प्रति-
विम्बितेन्दुभिरित्यन्तं पाठो नास्ति ।

2. ख. अम्भक्षेदः ।

संकल्पमात्रोपनताङ्गरागताम्बूलवस्त्राभरणप्रसूनैः ।
विभूषयामासुरभूतपूर्वं तनुं मुकुन्देन समं रमण्यः ॥ २४ ॥
वीक्ष्य सौभाग्यमवनेर्विहारं यामुने वने ।
वेधा[1] द्वेधा ततो राधामाधवावन्वयाचत[2] ॥ २५ ॥

अष्टात्रिंशः प्रबन्धः

वराड़ीरागेण गीयते

अमरगणशरणगुणविविधवृत्ते । धेहि राधे माधव दृगन्तम् ।
मयि करुणमनुचरणवलितचित्ते ॥ ध्रुवपदमिदम् ॥ १ ॥

धरणिधर धरसकलशक्तिरूपे । धेहि राधे माधवदृगन्तम् ।
मयि करुणामिह पतति मोहकूपे ॥ २ ॥

पशुपनृपतनये[3] वृषभानुकन्ये । धेहि राधे माधवदृगन्तम् ।
मयि करुणमुदयनुरागधन्ये ॥ ३ ॥

नीलमणिरुचिरकृतकनकभङ्गे । धेहि राधे माधवदृगन्तम् ।
मयि करुणमतिविषमविषयासङ्गे ॥ ४ ॥

रणितमणिरसनकुचतरलहारे । धेहि राधे माधवदृगन्तम् ।
मयि करुणमनघपटुचाटुकारे ॥ ५ ॥

कनकरुचिवसन[4]घनरुचिरचेले[5] । धेहि राधे माधव दृगन्तम् ।
मयि करुणमहह भव[6]जननखेले[7] ॥ ६ ॥

रासरसिकरतिकेलिलोले । धेहि राधे माधव दृगन्तम् ।
मयि करुणमसम[8]कृतहृदयदोले ॥ ७ ॥

---

1 क. वेधो ।
2. ग माधवान्ययाचत ।
3 क. ग तनय ।
4. ख. वसद ।
5. क. रुचिरले ।
ख. रुचिरसे ।
6. ख. उद ।
7. क खेल ।
8. क ख मशम ।

राधिकारमण वनमाली लीले । धेहि राधे माधव दृगन्तम् ।
मयि करुणमनिशभृशदुःखशीले ॥ ८ ॥

राधे शाधि विमूढं मामिह रतिकान्तसारतनुकान्ते ।
पतितं तमसि दुरन्ते तनुसुखिनं ते यथाकथासुरतिः ॥ २६ ॥

इति भगवतो रासावेशं[1]मनो नयनोत्सवं
त्रिदशपरिषद्द्र दर्शं दर्शं[2] प्रमोदभरान्तरा ।
तदनुचरितं स्मारं स्मारं स्मरज्जनमङ्गलं
कथमपि ततो धाम स्वीयं जगाम यथागतम् ॥ २७ ॥

अरुणकिरणग्रस्तां प्राचीमवेक्ष्य निशाकरो
रजनिरमणीरागासङ्गं विहाय कृतादरः ।
उषसि रभसादत्रेः पुत्रः पतिः किमु यज्वना-
मपरजलधिं पूर्वां सन्ध्यामुपासितुमभ्यगात् ॥ २८ ॥

हरिणानुमोदितास्ता अथ कथमपि वल्लवप्रमदाः ।
निजमालयमाजग्मुः प्रियतमसन्तोषसमधिकप्रमदाः[3] ॥ २९ ॥

अथ मुरहरः शश्वत्पश्यन् प्रमन्नमहेर्मुखं
तिमिरनिकरध्वंसाशंसा रुषेव भृशारुणम ।
अगमदमरश्रेणीचूडामणिर्निजमन्दिरं
पशुपनगरीनेत्रानन्दं विधातुमना इव ॥ ३० ॥

इति निजजनामन्दानन्दं चरित्रविचित्रितैः
शरदृतुकथाभव्यैः काव्यैः विवर्द्धयिषन् विभुः ।
अतनुत यथा श्रीगोलोके पुरा सह राधया
तदनुकरणं कुर्वन् सर्वं विहारमुपाहरत् ॥ ३१ ॥

---

1. ख. रसावेशं ।
2. क. परिषदर्शं
   ग परिषदार्शं ।
3. ख. समाधिकप्रमदाः ।

विदधदनन्तविहारं राधा साधारणप्रेमा ।
मञ्जुलकलाविलासी कैरवहासी हरिर्जयति ॥ ३२ ॥

राधामाधवकेलिकौतुकपरं यद्यन्तरं निर्भरं
चेतश्चेत्कवितासुधाजलनिधावाप्लावमाशंसति ।
श्रीमद्भागवतामृताम्बुधिसमुद्भूतं तदानन्दनं
नित्यानन्दकवेरवेहि भणितं श्रीकृष्णलीलामृतम् ॥ ३३ ॥

इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते श्रीकृष्णलीलामृते महाकाव्ये
रासोत्सववर्णने सानन्दमुकुन्दो नामाष्टमः सर्गः ।

॥ समाप्तश्चायं ग्रन्थः ॥

परिशिष्टम्

श्रीनीलाद्रिनाथशतकम्

श्रीनीलाद्रिनाथाय नमः

इन्द्रद्युम्नक्षितीन्द्रप्रणयकृतमहानुग्रहोदग्रचेता
नेता वृन्दारकाणां पतितजनसमुद्धारकारुण्यसिन्धुः ।
दीनानाथैकबन्धुर्जलधितटनटन्नीलशैलाग्रजाग्र-
न्नेत्राणां सम्पदेव कलिकलुषकरिध्वंससिंहो नृसिंहः ॥ १ ॥

चिन्तासन्तानसन्तानकममितकृपादृष्टिपीयूषवृष्टिं
नृणां संसेवितॄणां जननयनमनोरञ्जनं कञ्जनेत्रम् ।
सत्या मत्या नितान्तं नियमितकरुणाधारणापानवन्तः
सन्तः सन्तोषमन्तर्दधति निरवधि सन्ततं यं स्मरन्तः ॥ २ ॥

वाच्यं यत्तत्पदस्य द्यति भवकलुषं मोक्षसौख्यं च वृत्ते
यत्ते निर्वेदवृद्धास्तदज इति परंब्रह्मदारू ब्रुवन्ति ।
दैवादेवाविरासीदधिजलधितटं तद्द्वितीये परार्द्धे
धातुर्निर्वाणहेतुर्निखिलजनधनानन्ददं दर्शनेन ॥ ३ ॥

स्कन्दप्रोक्ते पुराणे परमिति भणितं भक्तिभाजं रहस्यं
यत् खण्डे जैमिनीये श्रुतिशिरसि च यन्मृग्यते वेदविद्भिः ।
पारावाराविदूरादनुवटविटपिश्रीलनीलाचलस्थं
लीलावस्थं नृणां तन्नरकभयहरं ब्रह्मदारु प्रपद्ये ॥ ४ ॥

ईष्टं त्रैपिष्टपानामधिधरणिकृतं यद्व्रजातीहतद्यो
देव त्वत्सेवकानां भुवनहितकृतामग्रगण्यः स धन्यः ।
नोचेन्नाथेदमित्थं कथमिममनुना दारुरूपेण भूपं
यात्रार्द्धे नान्यगृह्याः श्रुतिकुलसहजां भारतीं भाषमाणः ॥ ५ ॥

चक्रे यश्चक्रपाणेश्चरणमनुचरन्नश्वमेधान् सहस्रं
सद्माप्यस्यापि पद्मासनतनयवशो मालवानामधीशः ।
नूनं जानाति तोषं जनयितुमवनीनाथ एषोऽन्यथा चेत्
पर्याप्तं तृप्तये ते न खलु मखभुजो देवसाहस्रमूर्धन्ः ॥ ६ ॥

पापाकूपारपारं तरितुमघजुषौ पुण्डरीकाम्बरीषौ
शश्वाज्जातानुतापौ व्यवसितिमुचितां चक्रतुश्चक्रपाणेः ।
नूनं प्राग्जन्मभिस्तौ तव चरणसमाराधने दत्तचित्तौ
नैवं तद्वदैवयोगात्कथमिव घटतां तादृशोर्द्धीरिबुद्धिः ॥ ७ ॥

वैरञ्चे यत् प्रपञ्चे चरमचरमिति द्वैतमुद्भिन्नरूपं
भिन्नं तन्नैव यस्माद्र यदखिलो जगतोऽभिन्नमेवाभिपन्नम् ।
श्रुत्वा यन्नेति नेतीत्यखिलनीरसनाद्भाषितेनैव वृत्या
नीलाद्रौ दैवगत्या स्फुटमुदितमिदं शर्मदं ब्रह्मदारुः ॥ ८ ॥

भ्राजन्ति नीलशैले कलिकलुषसमुन्मुलिने सिन्धुकूले
कल्पन्यग्रोधमूले विमलमणितले लोलया लालिताङ्गी ।
भङ्गीदक्षैः कटाक्षैः सुरपुरनिलयान् पालयन्ती सपाला-
नङ्गीकुर्याद्धुरं मे तनुरनुदिवसं दारविदैत्यशत्रोः ॥ ९ ॥

वश्यानां शश्वदासेचनकमणिमयामन्दसन्दर्भवेशः
भ्राजच्छोभाविशेषः सविधतरसुधापूरगौराङ्गशेषः ।
भक्तानुग्राहकेष स्मितललितकृपापाङ्गभङ्गैरशेषः
श्रेयस्कृन्मानसे मे सततमुदयतां श्रीजगन्नाथ एषः ॥ १० ॥

नाम्नामाम्नायमध्ये वरद तव सतामेतदध्येतृसिद्धं
पुंसां संसारबन्धक्षयकृदभिमतं यज्जगन्नाथ नाम ।
येनाम्नातेन नाम्ना क्षमयति शतशः सद्य एवापराधान्
देहि सन्देहहीनं त्रिजगति कतमो नाम तन्नाद्रियेत ॥ ११ ॥

आम्नाते स्वीयनाम्ना त्रिजगति भगवन् क्षेत्रवर्ये पुरासी-
दाश्चर्यं योगचर्यादिभिरपि महदाकाङ्क्षितं ध्वांक्ष आप ।
सारूप्यं यत्त्वदीयं मणिमुकुटगदाकम्बुचक्राम्बुजश्री-
स्तीर्थस्पर्शात्तदेतद्भवदमवदधिष्ठानमाहात्म्यनाम्यम् ॥ १२ ॥

वन्देऽहं देववृन्दज्वरहरणसमारम्भसंरम्भवेग-
ज्वालामालाकरालानलबदनलसद्भविस्फुलिङ्गोग्रदष्टम् ।
रूपं तन्नारसिंहनवमुदितमिदं लोकविस्मापनं ते
येन श्रीविस्मृतेन क्षणमपि न भयं प्राणिनः प्राप्नुवन्ति ॥ १३ ॥

यत्राध्यास्तं समस्तं जगदिव रजतं शुक्तिकायामसत्यं
सत्याधिष्ठानकत्वात्सदिव विलसति स्वस्वरूपं विवेकात् ।
नित्यं बुद्धं विशुद्धं निरतिशयघनानन्दमुक्तस्वभावं
तद्ब्रह्माद्वैतमाद्यं स्थितमसितगिरौ दारुरूपेण भाति ॥ १४ ॥

वन्दे वन्दारुवृन्दारकमुकुटतटपोतशोणाश्मरस्मि-
श्रेणोदीपावलीनामुपहृतिभिरलं नित्यनिराजनीयम् ।
पादद्वन्द्वं प्रभातारुणकिरणगणोद्भासिरक्तारविन्द-
प्रत्यर्थीभूतमर्थिप्रकरसुरतरुं श्रीजगन्नाथकस्य ॥ १५ ॥

मायां ते नीलशैलाधिपदूरवगमां कोऽनुविद्यादविद्वा-
नेको वंभ्राम्यमाणो लयसमयकृतेकार्णवाकीर्णतोये ।
यद्वर्षीयान् महर्षिविटविटपीदले ज्ञानरूपं शयानं
वीक्ष्य त्वां संशयानः किमिदमिति मतिं साध्वयं नाध्यगच्छत् ॥१६॥

अर्च्चायामर्च्चितुं त्वां न रतिरुदयते हेलया यस्य पुंसो
नो वा सेवा प्रियाणां भवति च भवतो भाग्यहीनस्य यस्य ।
श्रीकान्तैकान्तभावं पदसरसोरुहे नोद्वहेत्तावके यो
मोघस्यैतस्य भूयादवनिनिरवनीभूरिभारायितस्य ॥ १७ ॥

इषद्वैषम्यधीर्नो भवति भगवतो निन्दने नन्दने ते
संमानेऽथावसाने न भजसि मनसो विक्रियावेशलेशम् ।
तुष्टे रुष्टे च भेदं न वहसि तदहो किं व्यधात्मज्जनोऽयं
प्रेमानामाभविष्यद्व यदि न सममतेः प्रापणे तेऽभ्युपायः ॥१८॥

नन्वेनं नान्यवायः प्रवणयति गुणातीतमन्धादिकं वा
किं वाचः स्यात् प्रसक्तिललितरचनया तोषतो वेदकर्त्तुः ।
किन्तु स्वकान्तभावान्भजति परमसौ दक्षभावानपेक्षो
योऽयं प्रत्यग्रहीतां शवरवरकृतामर्च्चनां पूर्णकामः ॥ १९ ॥

स्वप्रासादप्रतिष्ठापनमवनितले कर्त्तुकाम प्रकामं
ब्रह्माणं मानयिष्यन्नरतनुरपि यत्सद्मपद्मासनस्य ।
इन्द्रद्युम्नो नरेन्द्रः समगमदमलं दुर्गमं नैगमानां
प्राहुः प्रासङ्गिकं तत्फलमखिलसरो देव तेऽनुग्रहस्य ॥ २० ॥

वाराशावाविरासीत्कृतवति नृपतौ यत्क्रतूनां सहस्रं
प्रत्यङ्गं शङ्खचक्राङ्कितमखिलदशामोदितब्रह्मदारुः ।
निर्मातुं कर्मकारे न मिलति समभूत्स्वेच्छया यः स्वयम्भू-
स्तस्मै भ्रूवलीहल्लीशकघटितजगत्कोटऽयेहं नतोऽस्मि ॥२१॥

सप्ताहं तीरदेशे नृपवरसरसो यज्ञवेदीनिवासी
यत्त्वामानन्दकन्दं नयनविषयतां भाग्यभाजो नयन्ति ।
तेषां ज्ञानं विनापि श्रुतिशिखरमहावाक्यतात्पर्यधीजं
धत्से त्वत्सेवकानां भवमनभिमतं नैव कैवल्यनाथ ॥ २२ ॥

आज्ञा वेदत्रयी ते तदभिमतमिदं शर्मदं कर्मतन्त्रं
चातुर्होत्रं जनानां जनयति तनयस्वर्गवित्तादिकामम् ।
एवं ये वर्णयन्ति क्षयफलपरतां नैव संविद्रते ते
यस्मादाप्तस्वमात्मा(?) खलु निखिलनृणां नाल्पमन्दं ब्रुवीथाः ॥२३॥

गाथा गायन्ति ये ते कलिकलुषहरा हन्त ह्लादिं बहन्तः
सन्तुष्यन्तश्चरित्रे श्रुतिपथपथिके पावके तावकेऽन्तः ।
बिभ्रत्युन्निद्ररोमावलिमखिलतनौ संस्कृते त्वय्यनन्त
श्रेयांसस्ते पुमांसस्त्वयि परमगतिं यान्ति सौभाग्यवन्तः ॥ २४ ॥

कालाहिर्दंदशीति त्वयि विमुखमतिं दंदहाति प्रकामं
कामाग्निश्चर्करीति स्ववशमिममरिर्जंघनीति प्रमादः ।
धत्ते चित्ते कदाचित्तव पदकमलं नैव देवादतोऽसा-
वूर्ध्वाधो मध्यलोकेष्वभिमतविषये स क्रमीवं भ्रमिति ॥ २५ ॥

नाम्नस्ते जागरीति त्वदपचितिकृतौ चातुरीं चर्करीति
प्रेमाणं वर्भरीति त्वयि हृदयचरे-वञ्चनाचातुरीति ।
नित्यानित्यादरेण प्रहुवरमहतो वावदीति त्वदीयान्
धन्यो योऽनन्यभावां वत भवति मतिं सन्ततं तन्तनीति ॥ २६ ॥

रक्तो नैवाविमुग्धो बहति बहुतरं नानुरागं प्रयागे
नायोध्यां ध्यायतीषत्किमपि मधुपुरीमाधुरीं मन्वते न ।
नान्यत्र क्वापि पद्माप्रियतम रमते मानसं मामकीनं
तद्भूवैकुण्ठदेशे शरणद दिशते सन्निधौ सन्निवासम् ॥ २७ ॥

स्नातो वाराशिनीरे नियततनुमना मौनमास्थाय सुस्थः
श्रद्धापूतश्चतुर्द्धास्थितमसितगिरौ रूपवद्ब्रह्मदारुम् ।
यः पश्येद् विश्वसर्गस्थितिलयनिलयं पूरुषः पूर्वपुण्यै-
र्जीवन्नेवैष मुक्तः प्रविशति जठरं जातु भूयो न मातुः ॥२८॥

योगीन्द्रैः कोटिजन्मार्जितविविधतपोवैभवेनाप्यनाप्यं
निष्ठा तैः कृष्णपादाम्बुजपरिचरणे सद्भिरभ्यर्थनीयम् ।
भव्यानां वेदितव्यं बहुविदितवतां ज्ञानिनामप्यभीष्टं
द्रष्टुं वैकुण्ठनाथं सततमपि मनोऽकुण्ठमुत्कण्ठते मे ॥ २९ ॥

कारुण्योदन्यतस्ते पतितजनसमुद्धारणाधीनवृत्ते-
रग्रण्यो दुर्जनानां किल वृजिनकुलं खेलयैवाचरन्तौ ।
साधर्म्यान्मे सखायौ यदि परमपदं पुण्डरीकाम्बरीषौ
लोभाते लोभनीयं मम तदिति जगन्नाथ नाथामि तत्त्वाम् ॥ ३० ॥

नाहं कालाग्निदाहं प्रशमयितुमना नो मनागप्युदीते
चित्ते वित्ते स्पृहा मे शरणद गणये नापि सौवर्गसौख्यम् ।
भूयो भूयो भवन्तं वरद परमिमं प्रार्थयेऽभीष्टमर्थं
भूयान्नीलाचलेन्द्र त्वयि मम सततं स्वान्तमेकान्तवृत्तिः ॥ ३१ ॥

तीर्थे तीर्थेऽभिषेकं सविधि स कृतवान् पूरुषः पूर्वदेहे
स्थाने स्थाने निवासं बहुदिवसमसौ त्वत्पदाङ्काङ्किते च ।
काले कालेऽवतीर्णं कृतिषु पुरुधनं तेन धन्येन मन्ये
निन्ये नीलाद्रिनाथं नयनपथयुगं यः पुमानेकदापि ॥ ३२ ॥

नानालीलावतारा जगति भगवता मायया नो गृहीताः
सद्रक्षालोकशिक्षानिगमपथविपक्षादिहत्यादिकृत्ये ।
चित्रं तत्तच्चरित्रं विषयजडमनोरञ्जनं व्यञ्जयन्त-
स्तेषामाधारमन्तर्नियमितजगतं त्वामनन्तं नतोऽस्मि ॥ ३३ ॥

दीनानाथैकबन्धो तव यदि करुणा किञ्चिदञ्चेद्विकासं
संप्राप्नोति प्रयासं क्वचिदपि न पुमान्नुद्यतः पूरुषार्थे ।
शीलं नापैति लोलं सहृदयहृदयाह्लादसंपादकल्या
कल्याणी तस्य वाणी प्रसरति सुकरं किं न तेऽनुग्रहस्य ॥ ३४ ॥

रागावेशाद्द राशाघृतयुतमधुनः सेवया देव याव-
त्सोऽहं मोहं महान्तं स्वहितमतिनुषं नावगाहेऽनधीनः ।
तावन्नीलाचलेन्द्र प्रसहमभविकं मामकं सानुकम्पः
सम्पादानस्तिशेषः सकलकुलगुरो शिक्षयापेक्षणीयम् ॥ ३५ ॥

अध्यासीनस्य वेदीमखिलमपतनोगुंण्डिचामण्डपस्था-
मर्चां तामर्चयन्तोऽकृतनिकृति यथासम्भवेनोपचारैः ।
अप्येकस्यां रजन्यां जलनिधितनयानाथपाथोरुहास्यं
ये पश्यन्ति प्रवीणा रजनीदिवसयोः पारमेते प्रयान्ति ॥ ३६ ॥

प्रातः स्नातस्य पूते जलनिधिसलिले साधुनिर्वर्त्य कृत्यं
नित्यं वाचंयमस्य प्रणिहितमनसो भक्तभावेन देव ।
त्वद्रूपं पश्यतो मेऽखिलजननयनानन्दसौन्दर्यसारं
वारं वारं मुरारे तव यदि कृपया निर्वहेच्छेषमायुः ॥ ३७ ॥

निष्कामाः श्रोत्रिया ये नियमितकरुणा निर्मलाचारशीला
रक्षन्तो लोकशिक्षाममरवरमुखं शेरते किंचनास्ते ।
दृश्यन्ते सान्तरायाः कृतिषु खलु नृपा हन्त सन्तप्यमाना
नूनं संसारदूनं न सखयितुमृते त्वत्कृपामन्वदस्ति ॥ ३८ ॥

देव त्वां वासुदेवप्रभृतिषु कृतयो व्यूहतां चिन्तयन्त-
स्तत्र तन्त्रानुसारादगुणमपि गुणाभासमभ्यर्चयन्ति ।
तेषां त्वं सात्वतानामनभिमतमपि स्वीयसाधारणत्वं
धत्से यच्छेषपद्मासनसुरनिकरा भूरि सम्भावनीयम् ॥ ३९ ॥

तन्वानो लोकनेत्रोद्भवफलमखिलं संश्रितानन्तवर्त्मा
सामोदस्मेरपद्माकरपरिचरणप्रीतिरीतिं दधानः ।
उद्यन्माहेन्द्ररत्नोज्वलशिखरशिरः सीमनि द्योतमानो
मुक्तानां मार्गदाता हरिरपनयतादन्तरन्धंतमो नः ॥ ४० ॥

सौवर्गं भोगवर्गं क्षितितलमनुजे प्रापयन्तः प्रकामं
गोत्रामेकातपत्रां निजभुजविशतां पार्थिवाः पालयन्ति ।
त्वत्पादाम्भोजगन्धानुभवपरवशास्तादृशा अप्यनाशा
मुक्तागारानुरागं किल विजनचलं प्रीतिदेवान्तिकं ते ॥ ४१ ॥

दष्टं कालाहिदष्टं पशुधनतनयग्रामधामाद्यभीष्टं
जानानः शश्वदानुश्रविकमपि फलं दृष्टवत् भूरि कष्टम् ।
सोऽहं संप्रार्थये त्वां वरद वरपरतत्त्वविज्ञानमेकं
पार्थक्यं पुंस्यकृत्यं स्फुरति यदुदये येन भूयान् पुमर्थः ॥ ४२ ॥

व्यक्तं नक्तंदिवं यद्विलसति विमले मानसे मौनभाजां
क्षीराम्भोराशिकन्यानयनमधुकरद्वन्द्वविस्फारनेत्रम् ।
उन्मीलद्दन्तरोचिः प्रकरपरिलसत् केसरं नेत्रपत्रं
नीलाद्रीशान तत्त्वद्ववदनसरसिजं सन्ततं चिन्तयेऽतः ॥ ४३ ॥

चैद्यादिच्छद्मना येऽवनितलपतयो यज्ञिरे दैत्यवीरा
राजन्नैर्नित्यनीराजितकरचरणभूमिभारायमाणः ।
शेषावेषानपीमे भवति परमिकां भावनामुद्वहन्तो
हन्त त्वामापुरन्ते यदि किमुत विभो सेवकास्तावकीनाः ॥ ४४ ॥

त्वया येनोरुरुजा त्रिजगति भवता सन्दिताः सर्व एते
ब्रह्मेन्द्राद्या अपीशप्रसभमविशव भूरिभारं बहन्ति ।
तस्या स्वाधीनशक्तेरपि किमु घटने बन्धनं वन्दनं वा
नूनं देव त्वयापि स्वकृतमिदमहो कर्मभोक्तव्यमेव ॥ ४५ ॥

नानुगानं पुनाति श्रुतिरखिलगुरौ श्रीहरौ भावहीनं
कीनाशं त्वेष दीनावननियतमनाः पावयन्त्यात्मभक्तम् ।
चित्तस्यैकाग्रतायै स्पृहयति भगवान् ज्ञानकर्मानधीनो
मातङ्गोऽप्यत्र सङ्गात् क्षणमपि मनसः प्राप चैद्यो विमोक्षम् ॥४६॥

भूते भूते त्वमन्तश्चरसि नरहरेऽनेकरूपो यथार्क-
स्तोयाधारप्रभेदादुपहितवपुषा वस्तुतस्त्वेक एव
प्रत्येकं यः प्रतीतः स्फुटमनुमनुजं धर्मभेदः सुखादिः
सिद्धोऽसौ तत्तदन्तःकरणगुण इति प्राहुराचार्य्यवर्य्याः ॥ ४७ ॥

दारुब्रह्मन्नतस्ते परमुपकरणं यद्वहन्ति प्रधानं
नानाकारप्रपञ्चप्रणयनकलया चेतनस्त्वं निमित्तम् ।
स त्वं सत्त्वानुवृत्त्या भजसि जगदुपादानभावं विभो यद्द
दृष्टान्तैरूर्णनाभिप्रभृतिभिरुदितं तद्धि वेदाञ्चलेषु ॥ ४८ ॥

त्वं भो अम्भोरुहाक्ष व्यतिषजसि गुणान् दृश्यदृग्भावसिद्धा-
नन्योऽन्याध्यासयोगद्युतिमपि स भवानेव बन्धं छिनत्ति ।
हानिर्नैतावता ते शरणद करुणासाम्यबुद्धिप्रसिद्धे-
र्जीवादृष्टानुसाराद्दिशसि खलु बलकर्मवैयर्थ्यभीतः ॥ ४९ ॥

तृष्णा मुष्णाति बुद्धिं भवति रतिमतिं ग्राम्यभोगानुरागा-
दावेगान्मानसं मे न समयमयते साधुसंकल्पनायाम् ।
माया मायाति चेतो न वर्तं तव परं भावमव्यक्तहेतु
नेतुं तापं समन्तादनुसरति परं मामहंकार एव ॥ ५० ॥

त्वां सांख्यास्तत्त्वसंख्यापरिकलनपराः पूरुषं पञ्चविंशं
शंसन्तो दृष्टसृष्टेस्त्रिगुणपरिणतेरक्षरं साक्षीभूतम् ।
वैचित्र्याच्छोकहर्षाद्यनुभवविभवस्यानुदेहं विभिन्नं
भोगानां प्राकृतानां ग्रहणकृतमुदासीनमासीनमाहुः ॥ ५१ ॥

हाहा मोहाकुलीना द्रविणगणजुषो वेदविद्यानवद्याः
साधृष्टाश्चात्यनिष्ठा क्रतुसुकृतकृतो भाग्यसौभाग्यभाजः ।
श्रद्धामद्धा दधानाः श्रुतिगदितफले नीलशैलेन्द्रचन्द्रः
श्रीमत्पादारविन्दानभिमुखमनसः सन्ततं संसरन्ति ॥ ५२ ॥

भानुर्भानुं न धत्ते शिवद तव पुरश्चन्द्रमा जातचन्द्र-
स्ताराश्चैता न तारा न दहति दहनश्चञ्चला चञ्चलापि ।
त्वत्तेजः सिन्धुबिन्दूपचितनिजरुचो चोरयन्ति त्रिलोकीं
तत्त्वद्भाभासमानं जगदिदमखिलं वीक्ष्यते स्थूलसूक्ष्मम् ॥ ५३ ॥

लक्ष्मीजाने न जाने परिचरणविधिं पादपाथोजयोस्ते
नापि श्रद्धा समृद्धया श्रुतिभिरभिहितं कर्ममीमांसितं मे ।
दारुब्रह्मोपयातं मम हृदयपथं नैव तत्वं त्वदीयं
तत्कारुण्यं शरण्यं यदि भवति न तेऽनाथनाथास्मि नाथ ॥ ५४ ।

हेरम्बं नावलम्बे न भवमभयदं भावये भानुमन्तं
नैकान्तं चिन्तयेऽन्तर्न च तरितुमनाः सर्वदुर्गाणि दुर्गाम् ।
तस्मात्कारुण्यराशे त्वयि नियतमतिं दीनमप्यन्धकारे-
राहुत्याराधनीय प्रभुवरपतितं पाहि मामन्धकारे ॥ ५५ ॥

धन्या मन्यामहे ते जगति कतिपये ये जगन्नाथदेवं
सुप्रीते सागराम्भः प्लुतधुतकलुषा दृक्पथं प्रापयन्ति ।
नूनं नानापराधान् भगवति कृतवान् प्राप्य गेहादिमोहं
सोऽहं नीलाद्रिनाथाननसरसिरुहं यो न पश्याम्यवश्यः ॥ ५६ ॥

नेत्रं नैतत्पवित्रं भवति भवद्दते पुण्यलावण्यमूर्त्ते
पूर्त्तेष्टादौ च चेष्टाः परिहरति रतिः क्वाप्यसंसज्यमाना ।
चेतश्चेतस्ततो मे भ्रमति खलु निरालम्बनं वस्तुजाते
हा ते द्रक्ष्यामि लक्ष्म्यालयमुखकमलं नीलशैलेकबाहो ॥ ५७ ॥

कारागारे मुरारे भव इति गदिते सन्दितः कर्मपाशैः
सीदन्नाशैशबं ते शरणद पदयोर्नैव नामाप्यगृह्णाम् ।
तत्कामादिप्रमादैरुपहतमनसं संशयानं पुमर्थे
कस्मिन्नर्थे कृपाब्धे प्रवणयसि यतो मोचयेः कर्मभिर्माम् ॥ ५८ ॥

नैषां विद्यानवद्याभिजनधनमदः सम्पदः कम्पना वा
नेमे नेमे समृद्धया गुणगणकृतया नैति भीतिस्तथैतान् ।
चैतेषां नाकभोगेष्वपि सजति मतिर्द्धीमतां धूतपापा
येषु त्वं नीलशैलालय परमकृपापाङ्गमङ्गीकरोषि ॥ ५९ ॥

त्रैविद्यै रादिवेदाद्गदद इति परंब्रह्मदारूपविष्ट'
यत्रान्तर्वेदितव्यान्तररहितपरानन्द एवानुवादः ।
तत्र श्रीनीलशैलाधिपवपुषि सतां केव शङ्काङ्कुराणां
सम्भूतः सर्वसाधारणमतिरुदयेत् किं नु तस्मिन्नराणाम् ॥ ६० ॥

स्वर्भानोर्भीतिदायी प्रमुदितकमलोऽहर्निशं भासमानः
पूर्णः कामं कलाभिः कलिकलुषतमोध्वंसको ध्वान्तमात्रः ।
नित्यं निर्लक्षणोऽसावशितगिरिदरीगोचरः सर्वकालं
तीव्रं संसारतापं प्रशमयति नृणामद्भुतः कृष्णचन्द्रः ॥ ६१ ॥

भोगं दुर्वाररोगं भवजमनुभवंस्तीव्रनिर्विण्णचेता
नेतारं लोकसेतोस्तदिदमभिमतं देव याचे भवन्तम् ।
त्वन्मूर्तिस्फूर्तिहृष्यन्निखिलतनुरुहः श्वेतमत्स्यान्तराले
हित्वासूनन्तकाले तव जगदगदङ्कार यास्यामि लोकम् ॥ ६२ ॥

अर्चाचर्चा यदासीन्नवत भगवतः पादयोः पाविनी ते
वितं प्रत्तं प्रभूतं न च जलधितटे भूतये भूसुरेभ्यः ।
सेवादेवाद्दतेन व्यरचि समुचितानैव सर्वात्मना ते
तस्येदं कर्मणो मे परिणमनमभूद्दर्शनं तेन येन ॥ ६३ ॥

अन्तः पश्याम्यनन्तक्षपितकलिमलध्यानवर्त्माध्वनीनं
रूपे तद्दृष्टपूर्वं शितिशिखरिदरीकेशरीन्द्रायमाणम् ।
लोकातीतं तथापीश्वर तव विभवं गोचरीकर्त्तुं कामं
सान्द्रानन्दैककन्दं त्वदनुभवमृते लोचनं शोचतीव ॥ ६४

पूजासम्भारसम्पन्न किल मिलति मे नैव दानानि कामं
दातुं मे स्वापतेयं न च चरितुमहं तीर्थसार्थं समर्थः ।
नाप्यर्थः प्रार्थनीयः क्रतुकृतिषु मया साधनायासमीते-
स्तत्ते नामानि चित्ते शरणद शरणं यामि सुश्लोकमौलेः ॥ ६५ ॥

क्रोशन्तं सन्ततं मां भवभयशमनानाथनाथेति तीव्रं
तप्तं तापत्रयेण स्नपयसि न कृपापाङ्गपीयूषवर्षैः ।
दारुब्रह्मन्नुदारोचितचरितमिदं किं नु ते दीनबन्धो
नूनं देवौचितो ते पटु नटति तमामाशयो दारुणोऽयम् ॥ ६६ ॥

ज्योतिष्टोमादिनिष्टप्रदमिदमचिरात्पश्यतो नश्यदङ्गं
विद्वान् कः संविदानः श्रुतिगदितफले श्रद्दधानोऽनुतिष्ठेत् ।
नोचेत्त्वां शास्त्रयोने निजवचनमृतं कर्त्तुमेव प्रवृत्तं
नित्यं दाने फलानां प्रतिभुवमजरं जागरुकं लभेत ॥ ३७ ॥

राज्यं भोज्यं न किञ्चित्करमिव गणये पार्थिवप्रार्थनीयं
यस्मिन्नुन्मत्तचित्ता इव ननु मनुजा जानते नार्थजातम् ।
लोकाचारानुसाराच्छ्रुतिविहितमहं धर्ममालम्बमानो
निर्मानो नाथ नाहं तव चरणमृते भावयाम्यात्मनीनम् ॥ ३८ ॥

आवेशश्चेतसश्चेद्भत कुतुकवतश्चारुतारुण्यमूर्त्ते-
र्दोलायां ते वसन्तोत्सवमनुभवतः फल्गुमुष्टिः क्षिपद्भिः ।
गोविन्दामन्दलीलोत्कटविषयरसे मानसे मामकीने
नित्यं तं स्तूयमाने वलति मम कथं सन्निधातुं न चित्तम् ॥ ६९ ॥

ज्येष्ठायां पौर्णमासी भवति यदि युता सा गरिष्ठा तिथिनां
तस्यां श्रीनीलशैलप्रभुमुपचरितं राजराजोपचारैः ।
पश्येत्सन्तोषयन्त्याप्लुततनुमखिलानन्दनं चन्दनाक्तं
सोऽयं न क्लिन्नभूमिं पुनरपि लभते मातृगर्भोदकेन ॥ ७० ॥

यात्रा ते नैकनेत्रोदयफलमवनीमण्डनं गुण्डिचाख्या
विख्याता पिष्टपेषु त्रिषु दुरिततरून्मूलिनी स्वर्द्धुनीव ।
नाम्नापीयं पुनाना तव पदकमलं मूलमालम्बमानं
यानायासेन लोकं नयति नरहरे लोकता तावकीनम् ॥ ७१ ॥

हित्वा त्वां देवदेव बहुजनुसि सदानन्दनान्दीकरोऽहं
किं राज्ञां विज्ञमानामनितनिजहितो बालिशो वस्तुतस्तु ।
को वा दोषो ममैव प्रभवति हि भवान् प्रेरको वृद्धिवृत्ते
रित्युद्वेगो ध्रुवं ते हरिहरि शरण किं न शालीनतैव ॥ ७२ ॥

दृश्यं विश्वं यदेतद्विलसति तदहो योऽणुरूपेण गर्भे
बिभ्राणः सूक्ष्मबीजान्तरगवटमहाशखि दृष्टान्तदृष्ट्या ।
शेते निद्राणशक्तिः सृजति च समये तद्व यथावस्थनीतौ
नैतं द्वैतप्रपञ्चे जनकमनुभजेत्को जनो चेत्कृतघ्नः ॥ ७३ ॥

जानन्तोऽनन्त केचिन्न विषयमतयोनन्यसाधारणं त्वां
तां तां श्रद्धा समृद्धा विविधिफलरुचो देवतामर्च्चयन्ति ।
त्वं त्वेतेषां पुमर्थं परममविदुषां तं तमर्थं तदा ये
दानेनामात्मभूतः कलयसि कृपया चित्तशुद्धिं क्रमेण ॥ ७४ ॥

धान्यातीतं परं यत्प्रकृतिपुरुषयोर्निर्विशेषं प्रमाणा-
दस्तीत्येवोपलब्धं तदनुभवमृते क्लिश्यतां योगनिष्ठैः ।
आस्माकीनं तु चेतो जलदरुचितडित्पञ्चवासोवसाने
शोभासम्पन्निधाने स्थितमसितधराधीश्वरे सर्वभावम् । ७५ ॥

तोषं ने चेतसश्चेद्व वितरसि न हरेऽनारतं त्वय्यनन्ते
विद्वेषं तर्हि देव प्रदिशतमनिशं नन्वकिंचित्कराय ।
येनासावौग्रसेनरजनिचरपतिश्चिन्तयस्त्वत्कथाना-
मत्यन्ताभ्यासयोगादखिलमपि जगत् त्वन्मयं पश्यति स्म ॥ ७६ ॥

जाने नानावतारान् प्रथयसि पृथिवीमण्डलं मण्डयिष्यन्
माङ्गल्यैर्कीर्तिमाल्यैः किल सकलदिगामोदभिर्लोकबन्धो ।
नोचेत्संकल्पमात्रादुपनमति धराभारहत्यादिकृत्ये
विद्वद्भिर्देहयोगो भवति ननु कथंकारमङ्गीक्रियेत ॥ ७७ ॥

श्रद्धासूत्रेण बद्धा प्रभुवर भवता कर्णधारेण पारं
सारम्भं प्राप्नुवाना नयनिपुणमतिक्षेपणिक्षेपणीया ।
भूयादालम्बनं मे चपलफलकृते कर्मणेऽदृष्टवातै-
र्नत्तानुत्तारयन्ती भवसलिलनिधे भक्तिरेषा परांस्ते ॥ ७८ ॥

लोके लोके यदीयं जयति खलु महापावनं धावनाम्भो
मूर्द्धा शम्भोरतीवादृतममृतपदारोहसोपानवीथी ।
आनन्दाम्भोधिमम्भोरुहनयनभवन्मायया मूढ़चित्त-
स्तत्ते पादारविन्दं कतिमिह कतमो नाभिलक्षयेन्मनुष्यः ॥ ७९ ॥

कल्पादावद्वितीये त्रिजगति जनितः सर्वलोकेशयानी
जानीयां मे निदानं किमिति बहुयुगानेह संवारिमग्नः ।
तस्मै श्रान्तान्तराय स्वयमहह भवान् वेधसे नाभिपद्म-
स्थानस्थायैव तस्थे वरद तव कृपा कं न दत्ते पुमर्थम् ॥ ८० ॥

भूरेषा भूरिभूभृज्जलनिधिवलयाक्रान्तपर्यन्तभागा
नागाधीशस्य यस्योन्मणिकिरणकणामण्डले लक्ष्यतेऽणुः ।
सोऽयं नः सर्वशास्त्रोत्तमतमभगवत्तत्त्वतन्त्रोपदेष्टा
दद्यादिष्टान्यनन्तः परमपदगतौ संप्रदिष्टान्यृषिभ्यः ॥ ८१ ॥

ब्रह्माद्या लोकपालास्त्रिदशपरिवृत्तं मन्दतारूढ़चित्ता
आयता यत्र रात्रिंदिवमवशघटीयन्त्रवत्पर्यटन्ति ।
मायाख्यामोघशक्तिं जगदुदयलयस्थित्युदीतां मुरारेः
कल्पान्ते यागनिद्रां फणिवरशयने तां सुभद्रां नतोऽस्मि ॥ ८२ ॥

चक्रं नक्रेन्द्रकायप्रमथनविगलद्रक्तधारालधारं
दीप्तारं दैत्यवीरेन्धनदहनसमारम्भसम्वर्त्तकाग्निम् ।
कल्पान्तध्वान्तविध्वंसनपटिमनटचण्डमार्त्तण्डकोटि
शौटीर्यं कैटभारेः प्रहरणमपरिश्रान्तमन्तर्नतोऽस्मि ॥ ८३ ॥

लब्धत्रैलोक्यलक्ष्मीमदमुदितमहावीरदैतेयभूभृ-
न्निद्रासम्बन्धविद्रावणनिपुणसमारम्भमर्म्मनिनादम् ।
अच्छस्वच्छं प्रकृत्या मधुमथन भवन्नित्यसंयोगधन्यं
शङ्खं ते पाञ्चजन्यं करकमलमिलद्राजहंसं नतोऽस्मि ॥ ८४ ॥

प्रौढ़क्षेपानुरूपोत्पतननिपतनैर्दानवानीकपाना-
मङ्गप्रत्यङ्गभङ्गस्रुतवहलवसापङ्कलेपाङ्कलक्ष्मीः ।
प्रेमस्थेमास्पदं तेऽशितधरणिधराधीशकोनाशभीतेः
पातान्नेत्रान्तपाता हितभुवनजनामोदकौमोदकी नः ॥ ८५ ॥

संफुल्लं सर्वकालं प्रमुदितभगवद्भक्तभृङ्गान्तरं तत्
लीलापद्मं मुरारेः करसरसिरुहप्रस्फुरत्पौनरुक्त्यम् ।
अन्तर्दुर्वासनां मेऽपनयतु निविड़ां सन्ततं सन्निधाना-
दारादाघ्राय गन्धं यदुदितमसुरस्त्रैणगर्भाः पतन्ति ॥ ८६ ॥

पुण्यक्षेत्रेषु यन्न भ्रमणमकृषि ते पादपूतेषु पूर्वं
गुर्वादीन्दुर्वीनीतो यदहमुपनतो नैव दैवेन हीनः ।
आनन्दं त्वामविन्दन्नहमहमिकया दुर्जनैस्तर्ज्यमान-
स्तेन भ्राम्यामि काम्याभिमुखमतिरलं यत्र कुत्रापि न सः ॥ ८७॥

प्राप्तं संसारतापं निरवधिमधिकं तेन चित्तं निवृत्तं
चित्रं भूयः प्रवृत्तं भवति भवसुखाभासमात्रे ममात्र ।
इत्थं दुस्थोऽस्य हेतुं न च निरचिनवं श्रीजगन्नाथ को वा
माया ते मोहयन्ती जगदरणमृते त्वां तरीतुं समर्थः ॥ ८८ ॥

वन्दे नीलक्ष्माध्रोदितरुचिरशिरश्चारिसारङ्गनाभं
पद्मासद्मोपनीतप्रलयशिखिशिखाचक्रदिव्यास्त्रधारी ।
योगीध्यानायनाङ्गं सकलमलहरद्योतधामातिचन्ड-
रुद्रास्त्रं वीरभोगि प्रमितमिहपदं नाकपद्मारवादो ॥ ८९ ॥

आस्यं निर्णेनिजानः करकमलपुटाम्भोगतं भो मनुस्त्वा
जानन्दत्तावधानं जलनिधिमनयत्पारनिर्बन्धपूर्वम् ।
कालेऽथाप्यपरस्तं यदि जलविहृतिप्रीतिरात्तैकबन्धो
किं मे नोरीकरोषि त्वममलकमले मानसे मीनलीलाम् ॥ ९० ॥

यो दैव्यादित्यवीरान्कलशजलनिधेर्मन्थने दत्तचित्ता
न्मज्जन्मन्थानशैलात्त्वरिततरफलाधानतोऽनुग्रहीतुम् ।
पृष्ठेनाधत्त गोत्रं कमठतनुरहो तस्य ते को नु भूयान्
भूयान्मे धारणेन प्रभुवरधरणीधूर्वहस्यापि भारः ॥ ९१ ॥

भूयोभारेण लोकत्रयलयजलधिं गामधोऽधः प्रयाताः-
मुद्धर्तुं यः प्रयस्यन्बलिनमपि भवान्द्रागहन्नादिदैत्यम् ।
नूनं लुनेन्द्रशत्रोऽखिलभुवनपतेस्तस्य ते कोलमूर्त्ते-
रेषा देवेशशैलीशोतिशिखरिदरीगोचरो यद्विहारः ॥ ९२ ॥

उद्यद्दैत्येन्द्रकोपज्वलदनलशिखाक्रान्तवक्त्रान्तरालं
प्रह्लादप्रेमगृह्यस्मितललितकृपापाङ्गभङ्गीदधानम् ।
साधुनां प्रीतिदायि प्रतिभयमसतामित्यहो कल्पितं ते
रूपं तद्विश्वरूपस्फुटमुभयरसालम्बनं नारसिंहम् ॥ ९३ ॥

नोचत्वं याचमानः श्रयति निजमिति व्यञ्जयन्नब्जनाभ
प्रत्यादेशे च दोषानभिलषितफलप्राप्तितोषं च विद्वान् ।
यस्त्वं प्रापस्त्रिपादी भुवमवनिभुजस्तस्य देवोचितं ते
दातुं त्वेकं पदं नः किमु कपटवटो गुर्विदं दुर्विधत्वम् ॥ ९४ ॥

कृत्वा तिस्रः प्रकृत्वः क्षमितबहुशतक्षत्रियां विश्वधात्रीं
प्रादास्त्वं कश्यपाय स्मयरहितमना यद्विना वेशलेशम् ।
भारं विश्वम्भरायाः स्फुटमुपगमयन् स्फीतशितांशुकीर्त्ते-
र्वीराणां सम्मताहो भृगुतिलकमहोदारता तावकीयम् ॥ ९५ ॥

सीतानाथावतारप्रभुवरपरमप्रेमभाजस्त्वयीशे
वास्तव्यान् कोसलायां सकलतनुभृतो विभ्यतस्त्वद्वियोगात् ।
यत्वत्तत्त्वानभिज्ञानपि समगमयोऽकुण्ठवैकुण्ठलोकं
सोऽयं ते प्राभवाणामुपरि खलु नरीनर्त्तिकारुण्यराशिः ॥ ९६ ॥

यस्य ब्रह्माण्डपिण्डं स्फुटमटति फटासीम्नि सिद्धार्थरूपं
यस्यानन्तस्य लोकत्रयमुदरदरीगोचरीभावमेति ।
उत्साहस्तस्य नागाह्वयनगरसमुत्पाटने देव चेत्स्यात्
संख्यावन्तस्तदेतत्कथमिव भवतः पौरुषं संचरन्तः ॥ ९७ ॥

मोहार्थं हैतुकानां विधिविहितवधे दूषणं भाषमाणे
निर्वाणोपप्लवेन क्षणिकमिति मतं दर्शयन् सोपपत्तिम् ।
प्रत्यक्षापह्नवेन व्यवहृतसमयेऽप्यर्थवैतथ्यवादी
पुष्णन् कृष्णानुकम्पाधनमसि सुगतो दुर्गतस्तेन किं नः ॥ ९८ ॥

शुण्डादण्डप्रचण्डप्रकटभुजनटन्मण्डलाग्रोग्रपात-
च्छिन्नम्लेच्छोत्तमाङ्गावलिरलमवनीधर्मरक्षाकृते त्वम् ।
लोकस्तु स्तोकबुद्ध्यानुचितमपि वदन्नाथ नैवानुयोज्यो
दौर्जन्यादन्वकल्पक्षपणनिपुण यः कल्किनं त्वा ब्रवीति ॥ ९९ ॥

शान्तानां स्वान्तपङ्केरुहकुहरचरच्चञ्चरीकायमाणा
बिभ्राणा माधुरीणामधिधरणिचमत्कारसर्वस्य सारम् ।
उन्मीलन्नीलरत्नोच्चयरुचिरुचिरादारवीदानवारे
मूर्त्तिर्मङ्गल्यकीर्तिर्मम हृदि सुमनः स्रग्धरा साविरास्ताम् ।१००।

श्रीमन्नीलाचलाधीश्वरचरणयुगे नित्यदत्तावधानो
नित्यानन्दाभिधानो रचयति चयनि यच्छतं पद्यकानाम् ।
एतेन स्तूयमानो वितरसि भगवान्नीलशैलेन्द्रचन्द्रः
सान्द्रानन्दस्वभावां भवदवदहनानन्तसंतापशान्तिम् ॥

॥ श्रीनीलाद्रिनाथशतकं सम्पूर्णम् ॥

॥ प्रबन्धानामनुक्रमणिका ॥

प्रबन्धाः		पत्राङ्काः	प्रबन्धाः		पत्राङ्का
अजनि रजनि	···	११	द्रुतमभिसर सखि	···	४७
अमरगणशरण	···	६१	नन्दनन्दनमृदुल	···	३०
अविरतविगलित	···	२०	पश्यत नन्दकुमारं	···	९
कनककलश	···	४९	प्रणयवतीव्रज	···	४८
करुणारसभर	···	५४	प्रमुदितकुमुदे	···	१८
कलयति गुणवती	···	३७	मधुमथनवचन	·····	१९
काचन करसरसी	···	५१	मनसिज सुन्दर	···	४
काचन हरिरह	···	३३	मा निगदपुरुष	···	२६
किं मया कृत	···	४१	मृदितकुसुम	···	१२
किमधिधरणि	···	३९	मोहन पश्य विभा	···	१५
किमिति चकार सपदि	···	४२	मोहन वपुरुप	···	२८
किशलयरागवती	···	८	यावरसारुण	···	२१
चञ्चदलसविध	···	३२	रजनिरजनि	···	२५
जलतरङ्गसङ्गि	···	२८	रुचिरगन्धमलय	---	७
जय जय यदुनन्दन	··	५५	विकसित कुन्द	···	१७
जयतु जगदिश	···	५	सखि हे नन्दय	···	४६
तव जनुरनुकृत	···	३५	सखि हे लोकय	···	५३
त्वरितमुपेदपि	···	२४	सरसिजलोचन	···	६
दिशि दिशि दिशसि	···	४४	हरिरपि मनुज	···	१४

॥ रागाणामनुक्रमणिका ॥

रागनामानि	सर्गाङ्काः	प्रबन्धाङ्काः	रागनामानि	सर्गाङ्काः	प्रबन्धाङ्काः
आशावरी	१	४, ५	भैरवी	७	३३
	३	१३	मङ्गलगुज्जरी	२	८
आहारी	५	२२	मल्लार	६	२७
कर्णाट	४	१९	मारु	३	१४
कल्याण	१	३		४	१७
कल्याणाहारी	१	१	मालव	८	३४
कामोदी	७	३०	मुखावरी	१	६
केदार	३	१५		३	१२
	८	३५		७	३२
गौरी	२	११	ललित	६	२५
चिन्ताकेदार	५	२३	वङ्गलाश्री	५	२४
दक्षिणकामोदी	६	२६	वराड़ी	८	३८
	८	३६	वसन्त	४	२०
देशाख्य	२	९	विभास	२	७
धनाश्री	१	२	शङ्कराभरण	२	१०
नट	८	३७		७	३१
नादरामकेरी	६	२८	सारङ्ग	७	२९
भैरव	४	१६, १८	सौराष्ट्रगुज्जरी	५	२१

॥ छन्दसामनुक्रमणिका ॥

छन्दसां नामानि	सर्गसंख्या	श्लोकसंख्या
अनुष्टुप्	१	२२, २६
	२	१७, १९, २१
	३	४
	४	१, ६, १५, १७
	५	१६
	६	७, १३, १९
	७	४
	८	३, १३ ३०
आर्य्या	१	१, ११, १२, १४
	४	१०
	५	३, १२, १७, २०
	६	८, ९, १४, १६, १७
	७	३, ९-११, २१
	८	२६, २९, ३२
उपजाति	१	१०, १३
	२	१२
	४	११
	७	१
	८	२४
उपेन्द्रवज्रा	५	१०, ११
द्रुतविलम्बित	२	३, ४
	६	५
	७	७, ८, १८
	८	२३

छन्दसां नामानि	सर्गसंख्या	श्लोकसंख्या
पुष्पिताग्रा	२	४, १६
	६	५
पृथ्वी	२	२०, २३
	३	१६, १७, २७
	५	८
	६	६
प्रमिताक्षरा	७	१३
प्रहर्षिणी	६	२०
वसन्ततिलकम्	५	१
	८	५, १०, २२
वियोगिनी	२	२, ५, ८-१०
	३	१, १३
विद्युन्माला	५	४
	७	१४, १७
	८	१७
वंशस्थम्	२	११
	५	५; १३, १४
	६	२
	८	१८
वंशस्थविलम्	२	११
	७	२, १२
	८	१८

छन्दसां नामानि	सर्गसंख्या	श्लोकसंख्या	छन्दसां नामानि	सर्गसंख्या	श्लोकसंख्या
मन्दाक्रान्ता	३	३, १२		५	९
	४	५.		७	१६
	६	४		८	४, ११
	८	१	रुचिरा	१	२१, २८
मञ्जुभाषिणी	६	१५	शार्दूलविक्रीड़ितम्	१	२, ३, ५, ८ ९, १५ १६
	७	६, २२		२	१
	८	९, १४, १६		३	१०
मत्तमयूरी	५	२		४	७, १२ १३, १६, १८, १९
मालिनी	१	२५		५	६, १५
	२	६, १३, १८, २२, २४, २५		६	१०, ११, १८
	३	२, ५, १४		८	६, ३३
	४	८, १४	शिखरिणी	१	९
	५	१८, १९		३	११
	६	१२		७	१९
	८	७, ८, २०	स्रग्धरा	१	४, ६, ७, २३, २७
मृगेन्द्रसुखम्	२	३		८	२, १३, १५, २८
रथोद्धता	१	१७-२०, २४	समाधि	६	२
	२	१४, १५	हरिणी	७	१४, १९
	३	६-९		८	२७-३०।
	४	४			

॥ श्लोकानुक्रमणिका ॥

श्लोकाः	पत्राणि	श्लोकाः	पत्राणि
अजनिरजनिरेषा ..	३६	अमन्दसुन्दरस्मितं...	४९
अत्रासीत्कुसुमशर...	३५	अमलसकलचञ्च ..	१८
अथ ताः स्मरशर ..	३५	अम्भःक्षेपैर्हरि...	६०
अथ नन्दनन्ददनिदेश ..	४७	अरुणकिरणग्रस्तां...	६२
अथ मन्मथदर्पहारिणं ..	१२	अयि तं दयितं ..	२०
अथ मन्मथोन्मथिता...	४४	अयि मयि धातर्भ्रात...	४४
अथ मुरहरशश्वत् ..	६२	अये मयेदं...	३५
अथ रासविभ्रम ..	५९	अये राधा साधारण...	२१
अथ रासमण्डल...	५४	आनन्दं नन्दसूनो...	८
अथ वीतघनाघना...	१८	आसामासादयन्तीनां...	५१
अथ सा रसान्तर...	४०	आसीदग्रे य एक...	१
अथ सा व्रजपुर...	३०	इति चिन्ताजड़नयना ..	४२
अथ सा सपदिविवर्णा...	३९	इति ता गुणैरनल्पा...	२६
अथास्तु भूधरवर...	१०	इति दैवविनिन्दनं...	३१
अथोदयधराधरा...	२३	इति निजजनामन्दा...	६२
अथोषसि शशि...	११	इति निर्वर्णयन्तीनां...	३५
अनन्तरं ताः प्रमदाः...	३२	इति प्रकटकैशोरे...	१६
अनादृत्य सत्यं...	३	इति प्रियोपनीत...	४७
अनुनीतवतो...	४०	इति भगवती...	६२
अनूनजन्मान्तर...	३७	इति विविधविलासं...	९
अन्तर्दधे रास...	४४	इति विरहवतीनां...	३६
अन्तर्हितेऽथ दयिते...	३०	इति विस्मृतनिजशीला ...	३४
अपदे मानं दधतीं...	३९	इति वृषभानुतनुजा ..	५०

श्रोकाः	पत्राणि	श्लोकाः	पत्राणि
इति ब्रुवाणा कुसुमेषु ..	३३	ग्रसति रविः क...	१२
इति राधां दुराराधां ...	४३	घनं वृन्दावनं ...	११
ईति राधामाधवयो ..	५५	चलपृथुलनितम्बा ..	२४
इति सखीमनुयोग ..	४५	छन्दनोकलितचारु ..	१३
इति सा सविनयमुदिता	४६	जलरुहदलतल्पे ...	२२
इदमुदीरितवत्यथ ..	२२	जलान्तरुन्मग्न ..	६०
उद्भिडये तनुपक्ष्म ...	२१	ततो दूतीकृता ..	२३
उपरि तु परितापं ..	४०	तत्र कोटिकुसुमा ...	२०
उपलभ्य भूरिपरि ...	५०	तत्र चित्रकुसुम ..	८
एकदा किल कलिन्द ...	६	तत्रपत्ररथ ..	६
एकान्तं हरिरथ ...	४३	तत्र ता अतिवचो ..	१३
एकैकान्तरकान्त ...	२८	तत्रैकान्तं भुवन ...	३७
कवरविलसन्मल्ली ...	४८	तदङ्गनवसङ्गम ...	३३
कलावती कलावति ...	३८	तदीयनामाङ्कित ...	३
कलावतीति सम्बोध्य ...	३९	ताम्बूलरागघनसार ...	६०
कारं कारं विहारं ...	९	सा सां सौभगगर्व ...	२९
काव्ये मम स्यादिह ..	३	तूष्णिकं कुरुकुञ्ज ...	४०
कुतुकभरनिरस्ता ...	२७	दधिमथनकर्मणि ...	११
कृष्णस्तु तृष्णाकुल ...	३७	दरविकचसरोजपत्र ...	१२
केचिच्छङ्करकिङ्करा ...	१	दर्पोत्सेकादनन्तां ...	२
क्रमेण गगनाङ्गणे ...	२३	दुग्धविन्दुचयचुम्बी ...	१३
खचितसुवर्णाभरणा ...	३	दूतिकेलिवृषभा ...	२०
गर्गान्वयोदन्य ..	३	नन्दसूनुवृषभानु ...	५५
गलितकतिपय ...	३८	निकुञ्जपुञ्जेषु ...	३१
गाढ़ध्वान्तं चेतसि ...	३०	निपीयकृष्ण ...	७
गायं गायं हरेर्नाम ..	३	निपीय कृष्णमुरली ...	२३

श्लोकाः	पत्राणि
निपीय पीयूष...	४६
निरीक्ष नवयौवनं...	२५
निरीक्ष वीक्ष्या...	४४
निशम्य सुहृदिरीतां ..	१६
नेत्रं नोपहृतं ..	२७
नेदं नेदमितिश्रुति...	२
परिवादिमीमुदित ..	५९
पश्यन्तीनामथ दिशि...	५१
पश्यंश्चान्द्रीमस...	२३
पादन्यासै रुणुरुणु...	५९
पुलिनरचितखेला...	१५
पुलिने नलिनाक्षीणां...	२७
प्रतिदिनमितिकेलिं...	१७
प्रीतास्तुम्वुरुनारद...	५२
ब्रजयुवतिजनगीतं...	३६
भगवानथनन्दनन्दन...	१३
भूयो भूयः पशुप...	२१
मधुरमधुरवंशी...	१९
मधुरमधुरवेणु ...	१४
मनोज्ञतीरकानने...	५९
मनोविनोदिनीवीक्ष...	१८
मानसमशक्यापनयं...	४०
मिलितं केलिकङ्केलि...	१५
मुकुन्ददर्शमानन्द...	५९
मुकुन्दमरविन्द	१६
मुक्तसामिकृतकृत्य....	१४

श्लोकाः	पत्राणि
मुक्वसामिकृतकृत्य ..	१४
मुखविधुतविधुनां...	१७
मुखसरसिजषण्डं....	६०
मुदितरुचिरवशंशौ...	१६
मुरहरदरनिद्रा...	१३
मूर्ति काञ्चन काञ्चन ..	३७
यं वेदान् कवयो...	५
यस्याः पञ्चममाधुरी...	२४
यस्याङ्के नाभिपङ्के...	५९
यस्मिन्नध्यस्तमेत...	२
येनाजेन जगच्च...	१
यो वाचो मनसो...	३१
रागी सन्नपि तन्वी ..	४०
राज्ञा ससैन्याति ...	१४
राधामाधवकेलि	६३
राधा मुधापराधा...	४६
राधे शाधि विमूढं...	६२
रूपं केलिकला...	२७
लीलाभिराभीर...	३३
वदनपद्मगुणोत्कर...	४९
वनान्तरेऽनन्त...	३४
विचिन्वतीनामथ...	४४
विदग्धदनन्तविहार...	६३
विप्रलम्भमपि लम्भिता...	५२
विलसति रतिरासे...	५३
विशेषविज्ञा अपि...	२६

श्लोकाः	पत्राणि

श्लोकाः	पत्राणि
विस्मेरस्मेरनेत्रास्बु...	५१
वीथौ वीथौ विचकिल...	१८
वीक्ष सौभाग्य...	६१
वृषभानुनन्दनिकया...	४६
व्योम्नि मण्डलमख...	२३
श्रीगोविन्दपदारविन्द...	२९
श्रीनारदो ललित...	५५
श्रीमन्निलगिरीन्द्र...	४
श्यामतामरसचारु...	४९
सकल्पमात्रोपनत...	६१
सखीवचोऽमृत...	७
सञ्चरन्मूखसमीर...	३३
समदमदनावेशा...	५०
समनुभूय चिरं...	६०
समाप्य गोदोहन...	१३
समुल्लसल्लोचन...	१४
सशैवलं कुञ्चित...	६०
साथ नाथ वितथ...	४५
सारसालसविलास...	२०
सातिनन्दनमवेक्ष्य...	६
सातिपीनकुच...	६
साकूतहासपरिहास...	५२
सारासारविवेक...	२
सुखं कुञ्जे कुञ्जे...	४९
सैवं दैवं विनिन्दन्ती...	४४
सैषा रोष कषायिता...	४२
स्मरत मुकुन्द ममायं...	१
हरिणा हरिणाक्षिणां...	२९
हरिणानुमोदितास्ता...	६२
हरिरपि राधामानं...	४२
हृदयमदतशीलां...	५३